T. No. 81

उमासंहिता - Umāsamhitā

Copied from a ms. with no 73868 belonging to Adyar Library, Madras

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

No 81

2

उमासंहितास्थानप्रधानुक्रमणिका

अध्या		पृष्ठम्
2	उपोद्घातत्वेन विद्याधरारण्यब्राह्मणस्य असाधुवृत्तस्य पुण्यलोकप्राप्तिः	1-5
3	विद्याधरस्य रामभक्त्या पुण्यलोकप्राप्तिरिति यमं प्रति ब्रह्मणः समाधानम्	6-10
4	रामेण ब्रह्मलिङ्ग प्रतिष्ठापनपूर्वक परमेश्वराराधनं, संक्षेपतः रामायणकथनं वेदारण्ये रामस्य परमेश्वराराधनेन वीरहत्यादिदोषनिवृत्तिश्च	11-16
5	बालकाण्डे विश्वामित्रतपोरक्षणपर्यन्तकथा	17-28
6	तत् बालकाण्डकथाश्रवणफलवर्णनं च	28-49
7	अयोध्याकाण्डे रामवनगमनपर्यन्तकथा, शतमायनामकासुरवधहननं, रामस्य सर्वास्त्रप्राप्तिश्च	50-69
8	अयोध्याकाण्डकथा, तच्छ्रवणफलम्	69-82
9	आरण्यकाण्डकथा तच्छ्रवणफलं च	83-109
10	किष्किन्धाकाण्डकथा, तच्छ्रवणफलं च	109-118
11	सुन्दरकाण्डकथा, तच्छ्रवणफलं च	118-128
12	युद्धकाण्डकथा, तच्छ्रवणफलकथनं ग्रन्थसमाप्तिश्च	129-147

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

73868
P.L.

॥ उमासंहिता ॥

लोचनैव मुमुक्षूणां मनुष्याणां काश्यां श्रोत्रिय . .

. . . - - - वक्ष्यामि हामिनि

तस्योपदेशमन्त्रेण मुक्तिं विन्दन्ति मानवाः

उच्चार्य . . . . मानवाः

अमृते कथयिष्यामि इतिहासं पुरातनम्

अवन्ति विषये कश्चित् ब्राह्मणो वेद . . .

कृताध्ययनसंपन्नो विद्याधर इति श्रुतः

धनिनां श्रोत्रियादीनां स्वाध्याय व्रत पालिनाम्

कुले . . तो विशेषेण स्नानानुष्ठान तत्परः

स्वयमस्मै द्विजगणे वेदपाठपरश्च सः

सत्कन्यां श्रोत्रियकुले परिणीय शुचिस्मिताम्

मन्दस्मासेति विख्यातां रामां सर्वाङ्गसुन्दरीम्

दीक्षितो . . न सदाकाले जुहोति स्म विधानतः

एवं भूतो द्विजवरो वेदवादरतिः कृतैः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कदाचित्कृतसंवादस्तत्र स्वैरण्यमरोचत
विहाय वैदिकान्धर्मान्श्रुतिस्मृत्युररीकृतान्
पाषण्डैः कुत्ससंसर्गैः परदारपरायणैः
वेश्यापतिरभून्नित्यं द्रव्यत्यागकृतादरः
एवं व्यसनेषु गच्छत्सु (त्रि) भ्रातरो धनम्
उपेक्ष्य क्षाम्यकुरविंशं तं द्विजं वेददूषकम्
नष्टेषु द्रव्यजातेषु स्वदारनिरतो भवत्
सापि तं कुब्जा दृष्ट्वा पश्चात्त्वं गमिता भृशम्
मेति विज्ञाय चिन्तयानो दिवानिशम्

3 a

हारामेति (कुरो हिह)
चिन्त्य स्वच्चरति क्षितौ

हाराम राम रामेति हारामेति मनोरमे
इति शब्दं स बहुधा कृत्वा सञ्चरति क्षितौ
एवं काले बहुगते गतकल्मषपञ्जरः
रामस्मरणमाहात्म्यात् जीवन्मुक्तश्चचार सः
एवं भूतं द्विजवरं किंकराः कालचोदिताः
समाकाल्य सर्वप्राणानि कृष्टुम्
प्राणेषु संयोज्य प्राणास्तेजसि योजितः
कृष्यमाणे तेजसितु त . . वचित्र्यं गतः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विद्याधरो न दृष्टोऽत्र कुगतो ब्राह्मणाधमः ।
इति शङ्कितचित्तास्ते मार्ग . तेऽस्म परस्परम् ।
मार्गित्वा बहुकालं तु दूतास्त्विन्नमुखा भृशम् ।
राज्ञे निवेदयामासुर्ब्राह्मणान्वेषणक्रियाम् ।
भो भो प्रेतपते युष्मद्गणकस्य मुखाच्छ्रुतम् ।
वाक्यमाकर्ण्य वेगेन गतास्म ब्राह्मणान्तिकम् ।
महान्तं यत्नमास्थाय ब्राह्मणग्रहणे सति ।
न तत्र किञ्चिन्न दृष्टं निराशा जीविते वयम् ।
अस्मान्मुक्त स्वराजेन्द्र तवाज्ञाकारिणो वयम् ।
इत्युक्त . . . न चित्रगुप्तमथाह्वयत् ।
यमः :—

चित्रगुप्त त्वया सर्वं ज्ञातं सर्वज्ञ . . . ।
4 पं वै पापिनां धर्मिणां तथा ।
अद्य विद्याधराख्यस्य ब्राह्मणस्य विचेष्टितम् ।
आलोच्याच . . . णक पक्षपातविवर्जितम् ।
पत्रजालं परं मृश्य चित्रोऽदण्डधरं वचः ।
प्रोवाच नाथ मद्वाक्यं यथावच्छृणु सूर्यज ।
जन्मप्रभृति विप्रेण परदाराभिमर्शनम् ।
वृषलीगमनं चैव शूद्रस्त्रीगमनं तथा ।
रजकीगमनं चैव नर्तकीगमनं तथा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वेश्याकाराङ्गनाश्चापि सुधाकाराङ्गनां तथा
सूचिकारस्य ललनां प्रियां काकचिकरस्य च
वृषलीगमनं चापि कृतं रागव्यशाद्बुधम्
आरूढपतिताज्ञाता वर्धकीवारयोषितः
रजसो दर्शनात्पूर्वमनूढा ब्राह्मणाङ्गना ?
ऊढा च समगोत्रेण वृषल्यः कीर्तिता बुधैः
यः करोत्येकरात्रेण वृषलीसेवनन्द्विजः
सभैक्षभुग्जपन्नित्यं त्रिभिर्वर्षैर्विशुध्यति
वृषलीगमनाद्विप्रः कुम्भीपाकेषु पच्यते
परदाराभिगमनात्कालसूत्रेषु पच्यते
अयं विद्याधरो नाम पापिनामग्रसंभवः
अभक्ष्यभक्षणं चक्रे ग्राम्यानांच भक्षणम्
खट्वाङ्गकलकं चापि कुगुकं लशुनं तथा
निष्पावभक्षणं चापि व्याघ्रपर्णस्य भक्षणम्
उपोतकीभक्षणं च मौर्वीभक्षणमादरात्
एवमादीनि पापानि कृतवान्श्रद्धया सह
4a एकोद्दिष्टं नवश्राद्धं सपिण्डप्रेतभोजनम्
गोदानग्रहणं चापि कृतवान्विप्रपातकी
वेदमुच्चार्य वादेन दानग्रहणतत्परः
यतीनां निन्दकश्चायं महतां दूषकस्तथा

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवमादीनि पापानि नित्यमाचरते मुधा ।
तस्माद्विदेहनिर्वाणपदवीं नार्हते द्विजः ॥
एवमुक्तेन चित्रेण कालो दण्डधरो (रुषा) रूप ।
दण्डमुद्राँश्च संगृह्य वेधसोन्तिकमभ्ययात् ।
सत्यलोकं गतो राजा प्रेतानां कार्यसाधकः ।
प्रणम्य सत्यलोकस्थं चतुराननमस्तुवत् ।
जय वाणीश लोकानां सृष्टिकर्मविशारद ।
चतुर्मुख दयासिन्धो वेदवेद्य जगन्मय ।
सृष्टिस्थित्यन्तकरणे ब्रह्मविष्ण्वीशनामक ।
विज्ञापनं शृणुष्वाद्य दासस्य तव मारिष ।
एवं स्तुतो दण्डधरेण देवो
वाणीश्वरो वेदसमूहयोनिः ।
प्रोवाच कालं परमासनस्थः
संस्तूयमानो ऽप्सरसां समूहैः ॥
॥इत्युमासंहितायां द्वितीयो-
ऽध्यायः ॥

-x-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

2

("अथ तृतीयोऽध्यायः॥")

— · × · —

उमा —

स्रष्टुरन्तिकमासाद्य किं कृतं रविसूनुना ।
वदस्व कृपया मह्यं यच्च दृष्टं महेश्वर ।

ईश्वरः —

शृणु देवि प्रवक्ष्यामि विप्रस्य चरितं महत् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नरकादपि ।
विद्याधराख्यो विप्रश्च सायुज्यं मुक्तिमभ्यगात् ।

ब्रह्मा —

धर्मराज प्रवक्ष्यामि विप्रस्य चरितं महत् ।
यस्य स्मरणमात्रेण जीवन्मुक्तो भविष्यति ।
अयं ब्राह्मणदायादो रामनाम सदा स्मरन् ।
सहस्रनाम सदृशं रामनाम वरानने ।
कोटियज्ञसमं रामचन्द्रो भद्रेत्ययं मनुः ।
नमोन्तश्रुतिना प्रोक्तो वेदान्तेषु यथाक्रमम् ।
रामाय रामचन्द्राय रामभद्राय वा मनुम् ।
यावज्जीवं जपन्मर्त्यो जीवन्मुक्तो न संशयः ।
तस्मात्कौशिकगोत्रोऽयं जजाप परमं मनुम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

चित्रगुप्त: ——

अनेन सर्वपापानि बुद्धिपूर्वकृतानि च ।
बुद्धिपूर्वं गते पापे प्रायश्चित्तं न विद्यते ।
परदारपरद्रव्यपरान्नग्रहणे रत: ।
वेदवादविशेषेणैव गृहीतं धनसञ्चयम् ।
गवां प्रतिग्रहं कृत्वा विक्रयं कृतवानयम् ।
दुर्जनविद्वेषो सक्तो दुष्प्रतिग्रहणे रत: ।
अजस्रं विपर्यासकृत् शौचाचारबहिष्कृत: ।

ब्रह्मा ——

रा शब्दोच्चारणे जाते वक्त्रात्पापस्य निर्गम: ।
मकारस्मरणे जाते भस्मभावं व्रजन्ति ते ।
ब्रह्महत्यासहस्राणि स्वर्णस्तेयशतानि च ।
गुरुदारशतं चापि सुरापानशतं तथा ।
तत्संयोगिशतं चापि मुच्यते रामदर्शनात् ।
5 a औपासनाग्निरहिता: पञ्चयज्ञपराङ्मुखा: ।
सन्ध्यावन्दनहीनाश्च शुद्धा रामस्य कीर्तनात् ।
अभक्ष्यभक्षणासक्ता वृषलीगमने रता: ।
उच्चार्य सततं रामशब्दं मुक्ता न संशय: ।
गच्छन्तिष्ठन् स्वपञ्जल्पन् भुञ्जानो वापि मानस: ।
मुच्यते रघुनाथस्य नाम्नां कीर्तनतो द्विज: ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भोजनादौ स्मरन्मन्त्रं प्रतिग्रासं यथारुचि
उच्चार्य रामविजयं क्षत्रियो मुच्यते क्षत्रियोंऽहसः
रघुनाथस्य नामानि यो गृह्णाति नरो भुवि
विमुक्तः सर्वपापस्स विष्णुलोके महीयते
रामायणस्य श्लोकं वा पादं वा पदमेव वा
श्रुत्वान्तेषु प्रयुञ्जानो ब्रह्मभूयाय कल्पते
रामायणकथामेव ये शृण्वन्ति नरोत्तमाः
निर्धूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्
ये शृण्वन्ति कथां मर्त्या राघवेन्द्रजयार्थिताम्
पादं वा सर्गमेकं वा काण्डमेकमथापि वा
अश्वमेधसहस्राणां फलं विन्दन्ति मानवाः
(णां)
चतुर्विंशत्सहस्राणां श्लोकानामुक्तवान्मुनिः
तथा सर्गशतान्पञ्च षट्काण्डानि तथोत्तरम्
कृत्स्नं रामायणं यो वा शृणोति श्रावयेत वा
सर्वबन्धविनिर्मुक्तो ब्रह्मभूयाय कल्पते
अपुत्रो लभते पुत्रं कन्या सत्पतिमाप्नुयात्
6 विद्यार्थी लभते विद्यां वित्तार्थी धनवान्भवेत्
स्त्रियो रजस्वला श्रुत्वा पुत्रान्सूयुरनुत्तमान्
श्रुत्वा रामायणमिदं वन्ध्या पुत्रमवाप्नुयात्
(डुं)
करंबरस्य च वृद्धिस्स्याद्धनधान्यसमृद्धिता

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मित्राणां चैव वृद्धिस्स्यात्पुत्राणां च तथा भवेत् ।
आनुकूल्यं कळत्रेषु श्रवणादेव जायते ।
महादान प्रतिग्रहं महापापहरं भवेत् ।
चतुर्विंशति वाराणां मावृत्या नियमेव च ।
षडब्दकृच्छ्रे यत्पुण्यं यत्पुण्यं सेतुदर्शने ।
तीर्थाचलप्रेक्षणेच तत्पुण्यं श्रवणाद्भवेत् ।
ज्योतिष्टोमादि यज्ञानां केषाञ्चिदधिकारिता ।
श्रीमद्रामायणे काव्ये सर्वेषामधिकारिता ।
अर्थित्वादि विशिष्टस्य कर्मण्यधिकृतिर्मता ।
नित्यादि सच्चिनोपायो ब्रह्मज्ञाने यथा भवेत् ।
तद्वत्साधनसापेक्षा नास्ति रामायणश्रुतौ ।
श्रुत्वा रामायणं काव्यं मुक्तिभाग्जायते नरः ।
गायत्री वेदमातॄणां यथा श्रेष्ठतमा मता ।
तद्द्रामायणाख्यानं चतुर्विंशति वर्णकम् ।
धर्ममर्थञ्च कामञ्च गायत्रीजपतो लभेत् ।
मोक्षञ्च श्रवणादेव विन्दन्ति मनुजा भुवि ।
6 a संसारतापयुक्तानां जन्तूनां हतचेतसाम् ।
श्रीमद्रामायणाख्यानपीयूषं भेषजं भवेत् ।
दुरान्नदग्धजिह्वानां दुर्दानहतचेतसाम् ।
दुस्सङ्गहतचित्तानां कलिपाशानपाशिनाम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पत्र

देवपूजाविहीनानां श्रौतस्मार्त~~struck~~वर्जिनाम् ।

पितृपूजाविहीनानां नियुक्ताग्न्यर्चिनामपि ।

श्रीमद्रामायणकथा सर्वपापप्रणाशिनी ।

श्रीमद्रामायणं मर्त्या ये शृण्वन्ति महीतले ।

सर्वपापविनिर्मुक्ता विष्णुमन्दिरगामिनः ।

इति दण्डधरप्रख्यानुक्त्वा चतुराननः ।

श्रुत्वा धर्मो विश्वसृजोक्तवाक्यं

निवर्त्य लोकाच्चतुराननस्य ।

श्रुत्वैव तस्संयमिनीति संज्ञां

पुरीं गतो विश्वसृजं प्रणम्य ॥

॥ इत्युमासंहितायां तृतीयो-

ध्यायः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(२)

(॥ अथ चतुर्थोऽध्यायः ॥)

उमा —

भूयोऽपि श्रोतुमिच्छामि रघुनाथस्य वैभवम् ।
लङ्कायां रावणं हत्वा प्रतिष्ठाप्य विभीषणम् ।
किं कृतं रघुनाथेन तत्सर्वं वक्तुमर्हसि ।

शिवः —

हत्वा दशग्रीवमथाब्धिमध्ये
आरुह्य यानम्मनसा निसृष्टम् ।
धात्रा त्रिकूटाचलसन्निविष्टे
लङ्कापुरे रावणसोदरञ्च ॥

कृत्वा राजानमव्यग्रं दृष्ट्वा रामो महेश्वरम् ।
ऋक्षगोपुच्छहरिभिः रक्षोभिः परिवारितः ।
लिङ्गं रत्नमयं तत्र प्रतिष्ठाप्य महेशितुः ।
ब्रह्महत्यापनोदार्थं लोकानुग्रहकाम्यया ।
दृष्ट्वा रत्नमयं लिङ्गं रामनाथेति विश्रुतम् ।
निर्धूतसर्वपापास्ते शिवलोके महीयते ।
प्रतिष्ठाप्य महालिङ्गं ब्रह्महत्यापनुत्तये ।
सेतुमध्ये स्थितं लिङ्गं चामीकरविनिर्मितम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रामनाथेति विख्यातं सर्वपापापहारकम् ।

दृष्ट्वा माहेश्वरं लिङ्गं महारजतनिर्मितम् ।

अविद्यापाशमुक्तास्ते सायुज्यपदगामिनः ।

वार्धेरुत्तरकूले च सैकतं लिङ्गमुत्तमम् ।

स्थाप्य लोकस्य रक्षार्थं महापातकशान्तये ।

रामेण स्थापितं लिङ्गं गन्धमादनमस्तके ।

ब्रह्महत्यादिपापेभ्यो दृष्ट्वा मुच्येत मानवः ।

कृच्छ्रं वा द्वादशाब्दं वा ब्रह्महत्यानिवृत्तये ।

हयमेधक्रतुर्वापि रामसेतोः प्रदर्शनम् ।

मुनिभिर्वेदतत्त्वज्ञैः स्मृतं लोकस्य गुप्तये ।

षष्टिकृच्छ्रसमं प्राहुः श्रीशैलस्यावलोकनम् ।

तद्वद्रामेश्वरारण्यस्य दर्शनान्मुनयो विदुः ।

भक्त्वा सेतुं त्रिःप्रकारं तूणीराग्रेण राघवः ।

पुष्पकाशे समारुह्य जगाम दिशामुत्तराम् ।

श्रीतीर्थशिखरीन्द्रस्य शिखरे समुपस्थिते ।

मध्याह्नसमये रामः पुष्पकादवरुह्य च ।

आकाशगङ्गामावाह्य पूजां श्रीओङ्कारह ।

गत्वा तीर्थगिरिं मर्त्यः स्नात्वा मन्दाकिनीजले ।

दृष्ट्वा तीर्थगिरीशस्य लिङ्गं मुक्तो भविष्यति ।

फणानिर्माणमारुह्य किष्किन्धागिरिकन्धरे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुष्पकादवरुह्याशु स्नात्वा नद्यां शुभोदके ।
विरूपाक्षाभिधानं मां पूजयामास शास्त्रतः ।
किरातो बहुकालं मां मुक्त्यर्थं समपूजयत् ।
सवालिर्वानरेन्द्रोभूद्धत्वा वालिनमाहवे ।
रामाख्येन मया तस्मै मुक्तिर्दत्ता शराग्निना ।
भरद्वाजाश्रमं गत्वा रामस्सत्यपराक्रमः ।
भरतस्य सकाशाय प्रेषयामास मारुतिम् ।
श्रुत्वा हनूमतो वाक्यं भरतस्सत्यविक्रमः ।
पौरैरनुगतो दूरं रामं प्रत्युद्ययौ पुरात् ।
रामोऽपि भ्रातृभिस्सार्धमभिषिक्तो नरासने ।
न्यायेन कारयामास राज्यस्य परिपालनम् ।
शतं क्रतूनामाजह्रे विधिवद्भूरिदक्षिणैः ।
वाजपेयशतैरिष्ट्वा तथा बहुसुवर्णकैः ।
प्रत्यहं दशसाहस्रं गवां दानमकल्पयत् ।
ब्राह्मणानां विशिष्टानां प्रत्यहं कोटिसंख्यकम् ।
सुवर्णमददाद्रामो ब्रह्मार्पणधिया दरात् ।
सुहृष्टपुष्टजनपदा ब्राह्मणा वेदपाठिनः ।
राजानो बहुवीर्याढ्या वैश्या बहुधनाधिपाः ।
शूद्रा दानपराश्चासन् रामे राजनि भूतले ।
एवं स्थितो राघवाणां वरिष्ठो

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दिनारात्रं ब्रह्महत्याकृतोद्भूत ।
तस्योन्मादं चिन्तयानो दन्ते
मित्रावरुणं कुम्भवं प्राहवाक्यम् ॥

राम :—

वीर हत्यापनोदार्थं वदोपायं गुरो मम ।

वसिष्ठ :—

शृणु राघव राजेन्द्र सर्वपापापनोदकम् ।
पुरा कोलाहलो नाम वृषल : कालचोदित : ।
खड्गेन पितरं हत्वा गृहीत्वा मातरं ययौ ।
वेदारण्यं समासाद्य अरंसीत् काममोहित : ।
सोपि वेदवनेशस्य प्रभावात् क्षेत्रमृगौरवात् ।
वेदान्तज्ञानमासाद्य शिवानुग्रहहेतुत : ।
विमुक्तिं परमां प्राप्त इति शास्त्रेषु शुश्रुम : ।
त्वन्तु वेदवनं गत्वा समाराध्य वृषाकपिम् ।
नत्वा गुरुं शमीमूले मुच्यते होगणाद्भवान् ।
इत्युक्तो रुन्धती भर्त्रा रामो भ्रातृगणैस्सह ।
मातृभिस्सीतया सार्धं बलेन महतावृत : ।
वेदारण्यं समुद्दिश्य ययौ पुष्पविमानत : ।
वसिष्ठो वामदेवश्च जाबालिरथकाश्यप : ।
भरद्वाजो गौतमश्च ऋषयो ब्रह्मवादिन : ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिष्यैः प्रशिष्यैस्सहिता रामस्यत्वनुयायिनः ।
धृष्टिर्जयन्तो विजयास्सिद्धार्थो ह्यर्थसाधकः ।
अशोको मन्त्रपा श्च सुमन्त्रश्च ययौ द्रुतम् ।
ऋक्षवानरगोपुच्छैस्संयुतो वानराधिपः ।
रामपादावलोकार्थं गतो वेदवनं प्रिये ।
विभीषणस्समाकर्ण्य स्वैर्विभाविवर्धनम् ।
आगतं सेतुशिरसि तूर्णमभ्यर्णमभ्ययात् ।
राम इन्दीवरश्यामः पुष्पकादवरुह्य च ।
नियमेन समागत्य ब्रह्मतीर्थे वगाह्य च ।
वेदतीर्थे तत स्स्नात्वा स्नात्वा तु मणिकर्णिकाम् ।
लिङ्गं स्वायं ध्रुवं दृष्ट्वा विमुक्तो वीरघातकात् ।
स्नात्वा तीर्थवरे तत्र सन्तर्प्य पितृदेवताः ।
ब्राह्मणेभ्यो धनं दत्वा महादानान्यशोभत ।
रत्नं मणिं सुवर्णं च गजदानानि भूरिशः ।
रामन्नन्दपुरन्नाम बहुग्राममकल्पयत् ।
स्वनाम्ना स्थापयामास लिङ्गं सर्वार्थसिद्धिदम् ।
सकृत्तद्दर्शनादेव मुच्यते सर्वपातकात् ।
महापातकयुक्तो वा युक्तो वा क्षुद्रपातकैः ।
श्रीरामलिङ्गमासाद्य जीवन्मुक्तो भविष्यति ।
लक्ष्मणस्स्थापयामास लिङ्गं पापापनुत्तये ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हनुमानपि तत्रैव ~~लिङ्गं~~ शाम्भवं लिङ्गमुत्तमम् ।
स्वनाम्ना स्थाप्य संपूज्य विमुक्तः पातकोच्चतः ।
सह्यजायास्तटे रम्ये ~~स~~ ग्रामं बहुगुणान्वितम् ।
कृत्वा वायूद्भवः पापाद्विमुक्तो रक्षसां वधात् ।
पश्चाच्छतं महालिङ्गं कावेरीपुण्यरोधसि ।
तत्र तत्र प्रतिष्ठाप्य पूजयामास राघवः ।
पंपानद्यास्तटे चापि सुब्रह्मण्यनदीतटे ।
तथा क्षुरनदीतीरे वेण्णातीरे तथैव च ।
गोदावर्यास्तटे रम्ये रेवानद्यास्तटेषु च ।
तत्र तत्र प्रतिष्ठाप्य पुण्यदेशेषु राघवः ॥
न्यायेन कृतवान्रामो राज्यस्य परिपालनम् ।
॥ इत्युमासंहितायां चतुर्थोऽध्यायः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(२)

(॥ अथ पञ्चमोऽध्यायः ॥)

ईश्वरः—

शृणु वक्ष्यामि हे देवि बालकाण्डकथाफलम् ।
तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ।
इदं श्रुत्वा नरो भक्त्या तपस्सिद्धिमवाप्नुयात् ।
स्वाध्यायनिरतानाञ्च फलं प्राप्नोति मानवः ।
दुरन्नभक्षणान्मुक्तः पूतो भवति नित्यशः ।
9a श्रुत्वा संक्षेपमाख्यानं प्रत्यहं श्रावयेत वा ।
पठेद्वा प्रत्यहं मर्त्यो ब्रह्मभूयाय कल्पते ।
भक्त्यन्ते जपतां देवि संक्षेपकथनं महत् ।
क्षीयन्ते सर्वपापानि कृष्णपक्षे यथा शशी ।
धनधान्यसमृद्धिश्च पुत्रवृद्धिस्तथैव च ।
क्षेत्रारामाभिवृद्धिश्च भविष्यति न संशयः ।
नियमेन च संयुक्तः फलकामनया युतः ।
जपन्सत्वाच्च कृच्छ्राशीति फलं लभेत् ।
द्वितीयश्रवणादेव मनोक्तफलं लभेत् ।
अन्येषां श्रवणादेव निदिध्यासफलं लभेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मानिषाद प्रतिष्ठां त्वमगमश्शाश्वतीस्समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।
इमं श्लोकं प्रथमतो ब्रह्मणा प्रहिता सती ।
वाणी स्वयम्पूर्वकान्निस्ससार कुतूहलात् ।
तस्मादिदं बालकाना पाठ्यमक्षरतः पुरा ।
कृत्स्नशास्त्रेषु निपुणास्सर्वदेवेषु वल्लभः ।
वाग्मिनां प्रथमो भूत्वा लोकेषु विचरिष्यति ।
सर्वा पूर्वमियं येषामासीत्कृत्स्ना वसुन्धरा ।
प्रजापतिमुपादाय नृपाणां जय(पा)(शा)लिनाम् ।
येषां स सगरो राजा नामधर्मपरायणः ।
इक्ष्वाकूणां महावंशे रामो राजा अभिषिक्तो ।
10 महदुत्पन्नमाख्यानं रामायणमिति श्रुतम् ।
नतहि वर्तयिष्यामि सर्वं निखिलमादितः ।
धर्मार्थकामसहितं श्रोतव्यमनसूयया ।
अयोध्यावर्णनं श्रुत्वा मुच्यते सकलाघतः ।
दीर्घायुषो नरास्सर्वे धर्मार्थफलभागिनः ।
राज्ञो गुणाभिश्रवणाद्राजदोषात्प्रमुच्यते ।
मन्त्रिणां महिमानो तथा मन्त्री मुच्येत किल्बिषात् ।
नाध्यगच्छद्विशिष्टं वा तुल्यं वा शत्रुमात्मनः ।
इति शृण्वन्ति ये मर्त्यास्तेषां क्रोधादयो नहि ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्य त्वेवं प्रभावस्य इत्यादि ग्रन्थविस्तरैः ।
परस्य ब्रह्मणस्सूक्तिमिति स्यादिति चिन्तनम् ।
सरस्वाश्रोत्तरेत्युक्ता वाक्यानां विदिषा मता ।
ऋश्यशृ. ङ्ग. गुणाख्यानाच्छान्त्यादिगुणकीर्तनम् ।
अनेनानयनार्थाय वारमुख्यास्स्वलंकृताः ।
प्रेषिता रोमपादेन रूपयौवनशालिनः ।
तासां वश्ये मुनिश्शृङ्गका कथा प्राकृते जने ।
स्त्रीणां समक्षे वक्तव्यं ? संसारभयभीरुभिः ।
न जातु तासां संपर्कः पतनायैव केवलम् ।
रूपं गुणक्षयं चैव बलं प्रज्ञानमेव च ।
आयुः कीर्तिश्च नारीणां नाशयत्येव केवलम् ।
ऋषेरश्च आगमाद्वृष्टिर्जायते कथनाद्दशाम् ।
अवग्रहविनाशाय ब्राह्मणान्समभ्यर्चयेत् ।
शान्तापाणिं प्रत्यगृह्णाद्धर्मविद्विधिवत्प्रीतिपूर्वकम् ।
कुलीना रूपसंपन्ना शान्त्यादिगुणसंयुता ।
10a गृहकर्माणि दक्षा च पतिशुश्रूषणे रता ।
यस्य स्याद्देहिनी नारी सर्वार्थान्लभते हि सः ।
धर्ममर्थं च कामञ्च मोक्षञ्च त्रिपुरेश्वरि ।
यत्रानुकूल्यं दंपत्योः स्त्रीवर्गस्तत्र वर्धते ।
सनत्कुमारोपाख्यानमन्त्रिप्रवरभाषितम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रुत्वा नरो मोक्षकामी कैवल्य पदमाप्नुयात् ।
रोमपादपुरे विप्रं द्रष्टुकामेन शूर्पजा ।
तत्सकाशे परिप्राप्ति श्रवणा दुर्मान्अवेत् ।
सर्वथा प्राप्स्यसे पुत्रांश्चत्वार इति सं०यया ।
यमैवेमेति वाल्यार्थः कथितः कविना पुरा ।
यज्ञेनेति श्रुतेरर्थो यज्ञोपक्रमणो भवेत् ।
एतास्मिन्नन्तरे देवा यज्ञ आगार्थमागताः ।
ब्राह्मणमग्रतः कृत्वा क्षीराब्धेस्तटमन्तरम् ।
गत्वा श्रुत्युक्तमार्गेण श्रुत्वा चक्रधरं हरिम् ।
प्रार्थयांचक्रिरे राजन्रावणेन प्रपीडिताः ।

देवाः —

नमस्ते विश्वगुप्ताय शार्ङ्गिणे चक्रिणे नमः ।
सप्ताश्वलोचनाय त्वं सप्तसामीरभिष्टुतः ।
सप्तार्चिततनक्राय सप्तलोकैकनायक ।
सप्तसालप्रभेत्रे ते सप्तमाकाय ते नमः ।
इति स्तुतो देवगणेन देवान् ।
श्रीशार्ङ्गधन्वा ज्वलदप्रकाशः ।
आलोकयन्वृन्दनिदे नजद्रूणानां
प्रोवाच गंभीरतर स्वरेण ॥ ॥

हरिः —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओ ओमरा ब्रूत किमर्थमत्र

क्षीराम्बुधेस्तीरमतीव खिन्नाः ।

उपेत्य धात्रा वलसूदनेन

प्रचेतसा दण्डधरेण देवाः ॥

नमस्ते देव देवेश शङ्खचक्रगदाधर ।

विज्ञापनं दिविषदामवधार्य यदि प्रभो ।

श्रुत्वा चेतसि निश्चित्य तत्साधय दयानिधे ।

पुलस्त्यवंशप्रभवो रावणो नाम राक्षसः ।

य
गोकर्णे त(प)साराध्य चतुर्वक्त्रममुं पुरा ।

लब्ध्वा वरन्दशग्रीवो लोकपीडापरायणः ।

निर्जित्य वज्रिणं कालं पाशीय धेश्वरादिकान् ।

ह
वसूनि बहुधा हृत्वा भुङ्क्ते लङ्काह्वये पुरे ।

वह्निरान्धसिको जातः श्वसनो गृहमार्जुकः ।

वरुणो जलवाहस्तु तुम्बुरुर्गायको ऽभवत् ।

गुरुः प्रत्यहमासाद्य दिनशुद्धिं वदत्यसौ ।

पुष्पदन्तावस्य गृहे दीपस्तंभाविव स्थितौ ।

गन्धर्वाप्सरसां मुख्या राजर्षीणां प्रिया अपि ।

नागानां मनुजा ताना कन्यकाश्चेटिका भवन् ।

शुची गृहीतु कामोसा देवमातुश्च कुण्डके ।

छत्रं च पाशहस्तस्य ग्रहणे कृतकौतुकः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विमानं पुष्पकन्नाम कुबेरस्याग्रहीत्पुरा ।

11a एवमास्ते दशग्रीवो लोकपीडापरायणः ।

तं हत्वा रावण(ण) अन्मे अस्मन्नक्षस्व मा चिरम् ।

भवन्तं शरणं प्राप्ता नान्यो गतिरिहास्ति नः ।

विष्णो पुत्र त्वमागच्छ कृत्वा मानुष्य तुर्विधम् ।

रावणस्य विनाशाय रावणेर्निधनाय च ।

लवणस्य वधार्थाय गन्धर्वाणां वधाय च ।

कर्तव्यन्निश्चितं देव चतुर्णां देवशत्रुणाम् ।

श्रीहरिः—

जानन्नपि सुरानेवं श्लक्ष्णं वचनमब्रवीत् ।

उपायः को वधे तस्य राक्षसाधिपतेस्सुराः ।

श्रीमद्रामावतारेषु अब्रव क्रियते मया ।

(त्र)
तन्त्र शङ्का न कर्तव्या सर्वज्ञेनापि पृच्छते ।

इति श्रोतयितुं विष्णुस्सम पृच्छन्मरुद्गणान् ।

केनोपायेन तस्य स्याद्वधो लोकाहितैषिणः ।

जन्माय आ मोहितस्तु मनुष्यान्समुपेक्षते ।

अन्यथा तस्य हननं न भवेद्यत्र कुत्रचित् ।

पुरा कदाचित्केना कृतो युद्धो महत्तरः ।

पुरा पुष्पकमारुह्य विचचार ससैनिकः ।

अक्षौहिणी सहस्रेण चतुर्भिः परिवारि(त)ः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

युद्धोन्मत्तो दुराधर्षस्साचिवैः परिवारितः ।
मारीचेन प्रहस्तेन विरूपाक्षेण रक्षसा ।
12 वज्रदंष्ट्र पिशाचाद्यैर्निकुंभेन बलीयसा ।
कुंभे निकुंभा त्येन शोणिताक्षप्रजंघेना ।
युध्येन्मत्तेन मत्तेन देवान्तकयुतो बली ।
नागलोकं समासाद्य नागानां विजयं व्यधात् ।
एतस्मिन्नन्तरे शेषो मदन्तिकमुपागतः ।
नागस्य रक्षणार्थाय दक्षो हन्ता हयवाहनः ।
तेनासीत्तन्मन्यमतुकं लोकक्षयकरं महत् ।
तस्मिन्सुदारुणे युद्धे शस्त्रं कोटिरविप्रभम् ।
तद्वधार्थं महावेगात्प्रयुङ्क्ते रणमूर्धनि ।
तेन वक्षस्यभिहितश्चचाल न ममार सः ।
वरदानवशात्सृष्टुरवध्यस्सर्वदेवतैः ।
तादृशन्दुर्विनीतानामहमग्रेसरं युधि ।
हत्वा भयं प्रहरिष्यामि रघूणामन्वयेऽमले ।
भूत्वा नरवरः कालं सुचिरं परिपालये ।
इत्युक्ता देवता विष्णुस्तत्रैवान्तरधीयत ।
एतस्मिन्नन्तरे राजा साकेतपुरनायकः ।
पुत्रार्थमिष्टिमकरोद्धयमेधादनन्तरम् ।
महाभूतसमुत्थानं ये शृण्वन्ति महीतले ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तेषां भूतादिरोगेभ्यो नास्ति पीडा कदाचन ।
नृपाङ्गनानां राज्ञा तु पायसस्य प्रभेदनम् ।
शृणोति या स्त्री पुष्पाढ्या पुत्रं सा लभते चिरात् ।
12 a औषधग्रहणं श्रुत्वा पुत्रार्थं यास भर्तृका ।
करोति लभते नारी पुत्रं वंशविवर्धनम् ।
प्राप्ते सूपोच्छ्रये तावदित्यादि ग्रन्थविस्तरम् ।
श्रुत्वा यज्ञाकृतफलं प्राप्नोति श्रद्धयान्वितः ।
ब्रह्महा मुच्यते पापात्पितृद्रोही च मुच्यते ।
सुरापानरतो विप्रस्तथैव गुरुतल्पगः ।
प्रकीर्णकादि युक्ताश्च मुच्यते श्रवणादिह ।
प्राची होत्रेत्युपक्रम्य ये श्रवन्ति च दक्षिणाम् ।
तेषां कर्म सवैगुण्यं क्षाम्यत्येव न संशयः ।
कौसल्या जनयत्पुत्रं सर्वलक्षणलक्षितम् ।
चैत्रे मासि सिते पक्षे नवम्यामुच्चके रवौ ।
पुनर्वसु दिने मध्ये लग्ने कर्कटकाभिधे ।
कौसल्याजनयत्पुत्रं विष्णोरर्धसमन्वितम् ।
साक्षाद्विष्णोश्चतुर्भागं भरतं कैकयीसुतम् ।
अजीजनत्सुमित्रा च विष्णोरर्धसमन्वितौ ।
पुत्रौ लक्ष्मणशत्रुघ्नौ जनयामास मागधी ।
पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्पर्क्षे लक्ष्मणो जातश्शत्रुघ्नो ह्यनुजो बली ।
श्रीमद्रामजयन्तीति भण्यते नवमी तिथिः ।
13 उपवासं हरेः पूजां रात्रौ जागरणं तथा ।
कृत्वा नवम्यां शुक्लायां विष्णुमन्दिरगामिनः ।
नवमी चाष्टमी विद्धा त्याज्या विष्णुपरायणैः ।
दशम्यामुपवासेन कोटियज्ञफलं लभेत् ।
अष्टपत्रं समालिख्य मध्ये श्रीराममालिखेत् ।
मात्रा सह प्रपञ्चस्य गुप्त्यर्थं नररूपिणम् ।
पूर्वे तु भरतं पूज्य हरेरंशं सुदर्शनम् ।
दक्षिणे लक्ष्मणं पूज्य शत्रुघ्नं पश्चिमे तथा ।
उत्तरस्यां दिशि तथा सुमित्रां केकयात्मजाम् ।
दुर्गां विनायकं चापि क्षेत्रपालं सरस्वतीम् ।
कोणेषु पूजयेद्भक्त्या विष्णुभक्तो जितेन्द्रियः ।
भक्ष्यैर्भोज्यैर्बहुविधै रंभाचूतफलैस्तथा ।
नारिकेलैश्च पनसैरिक्षुकापूरसोदकैः ।
पायसैर्घृतसंमिश्रैर्गुडखण्डैश्च फाणितैः ।

— வங்கதனாக்கக்கனை —

अपूपैरक्लिशाभिर्हैरकैकैः पूजनं हरेः ।
एवं रामदिने पूजां कृत्वा पारणमाचरेत् ।
ब्राह्मणान्भोजयित्वा तु यथावित्तं यथाबलम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रामानुग्रहमासाद्य रामसायुज्यभागिनः

13 a चान्द्रायणशते हृद्य तप्तकृच्छ्रशते तथा

श्रीमद्रामजयन्त्यन्ते निन्दन्ति फलभागिनः

भुक्त्वा रामनवम्यारव्ये तिथौ मूढमना नरः

सहस्रवर्षपर्यन्तं पच्यते कालसू के

ब्रह्महत्यादिपापानां नवमीभयभीरुणाम्

अन्नमाचारमारव्यातमामे सर्वामनामया

ब्रह्महत्यादि पापानां दृष्टा शास्त्रेषु निष्कृतिः

नवम्यां रघुनाथस्य भोक्तॄणां नास्ति निष्कृतिः

सकृच्छ्रीनवमी मर्त्यः प्रोष्य श्रद्धया सह

एकादशीशतेनापि लभते मानवो ध्रुवम्

यथा वदु पत्नी तारेते वेदग्रहणतत्पराः

चक्रुर्गुरुकुलावासं धनुर्विद्याविशारदाः

एतस्मिन्नन्तरे विप्रो गाधिवंशसमुद्भवः

दृष्टुकामो महीपालं लोकानुग्रहकाम्यया

प्रत्युत्थान मुखे कृत्वा पापान्मुच्येत मानवः

ऋषेस्तवनमात्रेण ऋणान्मुक्तो द्विजो भवेत्

राज्ञः प्रतिज्ञा श्रवणाज्जीवन्मुक्तो भविष्यति

विश्वामित्रं दशरथो नरामं नेतुमर्हसि

इत्यूचिवान्स्त्रीप्रकारैः तस्यार्थो भव ईरितः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जन्मान्तरसहस्रेण कृतस्य तपसः फलम् ।
14 रामं परब्रह्म महं क्षणार्धमपि नोत्सहे ।
वियोक्तुं विश्वजगतामादिकर्तारमीश्वरम् ।
विडम्बय मानुषीं लीलां पुत्रेषु जनकस्य च ।
अहं जाने वसिष्ठाद्या जानन्ति पररूपिणम् ।
इत्युक्त्वा ज्ञानतत्वोयमिति मत्वा विसृष्टवान् ।
बलाबलप्रदानस्य श्रवणाद्बुद्धिमान्भवेत् ।
ताटकाख्यानमाकर्ण्य पापं ताडयते नरः ।
ताटकावधमाकर्ण्य विद्यानाशमवाप्नुयात् ।
मलदाश्च करूशाश्च जातौ जनपदौ पुरा ।
तस्याख्यानमपि श्रुत्वा मुच्यते मल[redacted]पञ्जरात् ।
यथैव मघवानिन्द्रो विमुक्तश्चाभिशापतः ।
तद्वद्विमुक्तो भविता अभिशप्तो ऽभिशापतः ।
श्रुत्वा सिद्धाश्रमाख्यानं चरान्चरानिध्यायिनः ।
श्रीमन्नाक्लिननाशस्य श्रोता सिद्धिमवाप्नुयात् ।
तपस्सिद्धिं ज्ञानसिद्धिं विद्यासिद्धिं तथैव च ।
कर्मणां फलसिद्धिं च मनुजो लभते ध्रुवम् ।
उपक्रान्ते सप्ततन्तौ ब्रह्मर्षिप्रवरेण वै ।
षष्ठेऽह्नि समनुप्राप्ते वेदिर्ज्वाला मण्डिता ।
दक्षिणस्यां निशाचराः प्रादुरासन्महाबलाः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

14a स तेन परमास्त्रेण मानवेन समाहतः ।
संपूर्णं योजनशतं क्षिप्तस्सागरसंप्लवे ।
उक्ता तपे तच्छब्दं फूत्कारो बोध्यतेऽधुना ।
सकृच्छ्रवणान्मर्त्यस्संसारन्तरति ध्रुवम् ।
रघुनाथप्रयुक्तेन मानवेन निशाचरः ।
तद्वद् प्रतिअक्षरस्यात्सत्कारपरिशीलनात् ।

हत्वा निशाचरनिकायमथाजिमध्ये
स्नात्वा कृते त्ववभृथे कृतपुण्यभाजि ।
स्थित्वा दिनानि चतुरो मुनिबृन्दमध्ये
प्रोवाच वाक्यन्निकरन्नियमेन युक्तः ॥

॥ इत्युमासंहितायां पञ्चमोऽध्यायः ॥

— X —

(2)

(॥ अथ षष्ठोऽध्यायः ॥)

ईश्वरः —

रामं प्रतिकृतां पूजां प्रशंसां मुनिना कृताम् ।
श्रुत्वा प्रशस्तो भवति यथा रामो जगत्त्रये ।
सीतानिवाहकल्याणं द्रष्टुकामा महर्षयः ।
जग्मुर्जनकराजस्य पुरीमैक्ष्वाकुणा सह ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शकटीशतमात्रन्तु प्रयाणे ब्रह्मवादिनाम् ।
अग्निहोत्रं पुरस्कृत्य श्रीराघवमनुद्रुतम् ।
यथा मधूनि सरघा न त्यजन्त्यपसारिताः ।
तद्वन्मुनिगणास्सर्वे रघुनाथस्य दैवतम् ।
श्रुत्वा कामवनाख्यानं प्रवृत्तोऽपि ग्रामं व्रजेत् ।
15 काशाख्यादि चतुर्णां हि पुरीणां गणकीर्तनम् ।
(ड)
श्रुत्वा नरो मोक्षकामी साधनं लभतेऽचिरात् ।
.. न्तानान्नृपकन्यानां विवाहस्य च कीर्तनात् ।
विदुषां विषयासङ्गो नास्तीति परिकीर्तितम् ।
विश्वामित्र ऋषेश्श्रुत्वा विशुद्धान्वय वर्णनम् ।
तस्मात्कुलीनजन्मानो भवन्ति प्रतिलोमजाः ।
स्कन्दस्य जन्म परिकीर्तितं वाक्यजातं श्रुत्वा
चिरेण इहलोकमनुव्रजन्ति . . . .

. . . . .

. . . . .

पूर्वजा भगिनी चापि मम राघव सुव्रता ।
नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ।
सशरीरा गता स्वर्गं भर्तारमनुवर्तिनी ।
कौशिकी परमोदारा सा प्रवृत्ता महानदी ।
एतच्छ्रुत्वा वरं कापि साध्वीनां लोकगामिनी ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भवत्येव न सन्देहो नात्र कार्या विचारणा ।
एवमन्यानु या कान्तमनुगच्छति गामिनी ।
अग्रजानां गता लोकं पूज्यते प्सरसां गणैः ।
तिस्रः कोट्यर्धकोटीश्च यानि रोमाणि मानुषे ।
तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति ।
व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् ।
15a एवं लोकान्तरं कान्तमादाय स्वर्गगामिनी ।
गृहात्पितृवनं यान्त्या पादस्पर्शान्नजोक्षिता ।
कृतार्था मन्यते भूमिर्दुर्जनस्पर्शदूषिता ।
वायुस्स्वदेहशुद्ध्यर्थं चन्द्रमा भास्करस्तथा ।
नक्षत्राणि च भूतानि द्रष्टुं वाञ्छन्ति तां सतीम् ।
स्पृष्ट्वा कृतार्थतां प्राप्ता भवन्ति पतिमन्वगाम् ।
गच्छेत्कान्तं ब्राह्मणी नो पतिमालिङ्ग्य सादरम् ।
क्षत्रियाणी पतिं ग्राह्य कौकसं नापि कुत्रचित् ।
वैश्या तथा शूद्रयोषित्कौकसं गात्रमेव वा ।
उद्दिश्य वा पतिं गच्छेल्लोकान्तरगतं प्रियम् ।
उपास्य रात्रिशेषं तु शोणाकूले महर्षिभिः ।
हुत्वा चैवाग्निहोत्राणि प्राश्यन्चामृतवद्धविः ।
गत्वा गङ्गातटं रामो विश्वामित्रमभाषत ।
शैलेन्द्रो हिमवान्नाम धातूनामाकरो महान् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इत्युपक्रम गङ्गाया वैभव श्रवणाद्धरा: ।
विमुक्त बद्धास्ते सर्वे गङ्गासायुज्यमाप्नुयु: ।
पुरा राम कृतोद्वाह शितिकण्ठो महातपा: ।
दृष्ट्वा च स्पृहया देवीं मैथुनायोपचक्रमे ।
इत्युपक्रम्य देवेन कार्तिकेय समुद्भवम् ।
सुरसेनापतित्वंच पापान्मुच्येत पातक: ।
16 कुमारसंभवंश्चैव धन्य: पुण्यस्तथैव च ।
भक्तश्च य: कार्तिकेये का.. स्थ भुवि मानव: ।
आयुष्मान्पुत्रपौत्रैश्च स्कन्दसालोक्यमाप्नुयात् ।
अथ वर्षशते पूर्णे तपसा राधितो मुनि: ।
सगराय वरं प्रादाद्दित्यो तद्ग्रन्थविस्तरै: ।
ब्राह्मणानां वरं दातुं सामर्थ्यं प्रतिपादितम् ।
यज्ञकर्मणि वेदज्ञो यष्टुं समुपचक्रमे ।
श्रुत्वा गन्धर्वमेधस्य करणं श्रुतिदारणम् ।
ब्रह्महत्यादि पापेभ्यो मुक्ता स्युश्चद्द नरा: ।
ततस्तेनाप्रमेयेन कपिलेन महात्मना ।
भस्मराशीकृतास्सर्वे काकुत्स्थ सगरात्मजा: ।
तस्मान्न जातु विप्राणां द्रोहं कुर्यान्मनागपि ।
सा तस्मिन्पतिता पुण्या पुण्ये रुद्रास्य मूर्धनि ।
श्रुत्वा रुद्रस्य माहात्म्यं रुद्रलोकं स गच्छति ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्यां विसृज्यमानाया सप्त स्रोतांसि जज्ञिरे

उमा —

त्यक्ता जटाच्छूडतया भगीरथ तपः फलात्
कथं तस्य रथं त्यक्ता सप्तधा गमनं वद

महेश्वरः —

शृणु देवि प्रवक्ष्यामि गङ्गाभेदनकारणम्
विसृष्टायां तु गङ्गायां मायां बिन्दुसरस्यपि
16 a क्रोशमात्रे ब्रलाग्रे वृषभो नाम पर्वतः
तेन रुद्धगती गङ्गा स्तिमितासीन्महारयात्
भगीरथापि राजर्षिस्तुष्टाव परया गिरा
तेन तुष्टो महादेवः प्रसादमकरोत्पुनः
नन्दीश्वरं समाहूय प्रेषयत्कार्यसाधने
नन्दी कुठारमादाय भेदयामास पर्वतम्
सप्तधा भेदिते तस्मिं सप्तस्रोतांसि जज्ञिरे
सप्तमी चान्वगात्तासां भगीरथमथो नृपम्
तच्चं करशिरोभ्रष्टं भ्रष्टं भूमितले पुनः
व्यरेच्चत तदा तोयं निर्मलं गतकल्मषम्
तत्रर्षिगणगन्धर्वा वसुधातलवासिनः
भवाङ्गपतितं तोयं पवित्रमिति पवित्रमिति पस्पृशुः
भवाङ्गे पतितं यस्मात्कुत्रापि सलिलं नराः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धृत्वा विधूतपापास्ते शिवमन्दिरगामिनः ।

धृत्वा शिवस्य सलिलमभिषेचनसंभवम् ।

मुच्यन्ते संसृति भयात् ब्राह्मणाद्याः पिबन्तु वा ।

गङ्गा संप्लावयामास यज्ञवाटम्महात्मनः ।

तस्यावलेपनं ज्ञात्वा क्रुद्धो जह्नुस्तु राघव ।

अपिबत्तज्जलं सर्वं गङ्गायाः परमाद्भुतम् ।

हृदि ध्यायन्महादेवं शिवानुग्रहवैभवात् ।

17 अपिबच्चोदकं वार्धेर्यथा वै कुंभसंभवः ।

गङ्गामुपनयन्ति स्म दृष्ट्वा ते महात्मनः ।

शिवानुग्रहवैशिष्ट्याच्छ्रोत्राभ्यामसृजत्पुनः ।

+ तस्यावलेपनम् +

पितामहान्भस्मकृतानपश्यद्दीनचेतनः ।

अथ तद्भस्मनां राशिं गङ्गापतनमुत्तमम् ।

प्लावयत्पूतपाप्मान ~~स्व~~ स्स्वर्गं प्राप्ता रघूत्तम ।

ब्रह्माण्डस्ताडितः पूर्वं हरिणा छिद्रतां गतः ।

ब्रह्माण्डं बाह्यतो येन दशपाशभृता प्रतम् ।

तेन छिद्रेण तत्तोयं विवेशाण्डं वरानने ।

यः

यथा कथंचिद्वै दृष्ट्वा भक्तितोऽनन्यमयो सकृत् ।

गङ्गा तारयते नृणां कुलानां शतमंभसा ।

कृन्न

येस्तु स्पृष्टा वाशिष्टा च गङ्गा भक्त्या स~~कुञ्जरै~~ः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुलानान्तु सहस्रन्तु तेषां धारयते भयात् ।
पीता मधुद्रवा मर्त्यैर्यैर्गङ्गा भक्तितस्सकृत् ।
तेषां कुलानामयुतं भवात्तारयते कुलम् ।
यैः पुण्यवाहिनी गङ्गा सकृद्दृष्टा वगाहिता ।
तेषां कुलानां लक्षन्तु भवात्तारयते शिवा ।
यैर्दिनं सेविता गङ्गा भक्त्या पुण्यजनैर्नरैः ।
कुलानां दशलक्षन्तु तेषां धारयते भवात् ।
17a गङ्गे गङ्गेति गङ्गेति यैस्त्रिसन्ध्यमुदीरिता ।
दूरस्थेनापि तत्पापं हन्ति जन्मत्रयार्जितम् ।
सहस्रयोजनस्थोऽपि त्रिसन्ध्यं यस्समाहितः ।
गङ्गे गङ्गेति च ब्रूयात्सगच्छेत्परमां गतिम् ।
योजनानां सहस्रेषु गङ्गां स्मरति यो नरः ।
अपि दुष्कृतकर्मासौ लभते परमां गतिम् ।
गङ्गायां वैष्णवे शक्तौ परब्रह्मणि भावनाम् ।
न कुर्वन्ति च ये ~~...~~ मर्त्या न तैस्तु सहसं वसेत् ।
नदीनामवमन्तव्यं कदाचिदपि सुव्रते ।
गङ्गारयं समाकर्ण्य सागरोथ भगीरथम् ।
प्रार्थयामास गङ्गायाः प्रवाहो वेगवत्तरः ।
सोढुं न शक्यते त्राहि गाधो मे भविता प्रभो ।
इत्युक्तवन्तं नारीशं माभीरित्यवदन्नृपः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अस्मत्कुलीनैस्संवृद्धो मया किं दूयसे ऽधुना ।
भगीरथोऽपि राजर्षिः प्रोवाच तनयान्निजाम् ।
पुत्री वाक्यं समाकर्ण्य कुरु कार्यमनन्तरम् ।
त्वत्पूर्वप्रभवैः पूर्वैः खानितः प्रपितामहैः ।
पूर्वैराचरितो धर्मो न हन्तव्यो न्वयोद्भवैः ।
18 इत्युक्ता स्वर्धुनी पित्रा करिष्ये वचनं तव ।
सहस्रधा नदी भूत्वा तदा सागरमभ्यगात् ।
स गत्वा सागरं राजा इत्युपक्रम्य शृण्वताम् ।
पितरस्स्वर्गमायान्ति निरयस्था अनूदकाः ।
गङ्गावतारमारभ्य श्रावयेच्छ्राद्धभोजने ।
पितरस्तेन तृप्तास्स्युर्यावदाभूतसंप्लवम् ।
त्रीन् पथः पावयन्तीति ततस्त्रिपथगा स्मृता ।
सन्तारं कथयामास सर्षिसंप्लस्स राघवः ।
भवाम्बुधौ निमज्जनां वीक्षणात्तारकस्स्वयम् ।
रामस्सुरनदीं नाना तारयत्का विचित्रता ।
श्रुत्वा पीयूषमथनं सुरासुरविनिर्मितम् ।
औषधस्वीकृतिं कुर्यान्तस्य रोगो ~~न विद्यते~~ विनश्यति ।
धन्वन्तरिं गरुत्मन्तं मणिराजं च कौस्तुभम् ।
अच्युतश्चामृतं चैव स्मरेदौषधकर्मणि ।
उच्चैश्श्रवा हरिश्रेष्ठो मणिरत्नं च कौस्तुभम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इदति ष्ठ नरश्रेष्ठ तथैवामृतमुत्तमम्

अदितेरिन्द्रसंवादं श्रुत्वा तु मरुताञ्जनिम्

असपत्नो महीं भुङ्क्ते राजा शक्रो यथा दिवम्

अहल्यामुक्तकाले तु इन्द्रेण कृतसङ्गमाम्

18 a आत्मानं मां च देवेशं सर्वदा रक्षमानद

इत्यादि प्रियवार्तां च शक्रस्य गमनं तथा

गौतमस्य नरेन्द्रस्य सदृशाकृति शोभने

शापमिन्द्रे च भार्यायां मुनिना कृतमञ्जसा

श्रुत्वा मुच्येत मनुजो नारी वा व्यभिचारिणी

मुच्यते सर्वदोषेभ्यो व्यभिचारकृतान्नि जात्

इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ

गजसिंहगती वीरौ शार्दूलानिव रूपिणौ

इत्यादिकृतजालन्तु जनकेन सुभाषितम्

विश्वामित्रऋषेर्भक्त्या पुण्यकं ब्राह्मणमाप्नुयात्

ब्रह्महा मुच्यते पापान्मित्रहा मुच्यते ततः

सावित्रीपतितश्चापि व्रात्या नाचारदूषितः

तपसां सिद्धिमाकर्ण्य विश्वामित्रस्य मानवः

तपश्चरणि संसिद्धिं लभन्ते मानवाश्चिरात्

विश्वामित्रो महातेजाः पालयामास मेदिनीम्

इत्यादिश्रवणादेव पठनादिजितेन्द्रियः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सादा
कामधेनु ~~प्रभावाच्च~~ सर्वान्कामानवाप्नुयात्
दुरन्नभक्षणा.. ता भविष्यति न संशयः
हुंकारेणैव तान्सर्वान्निर्दहेद् महानृषिः
19 तस्माद्विप्रेषु नावज्ञा कार्या भूतिमिहेच्छता
अवज्ञाता दहन्त्येते हुंकृत्या वीक्षणेन च
केन चित्तु थ कालेन देवदेवो वृषध्वजः
इत्यादि ग्रन्थजालेन शिवो ध्येयश्शिवंकरः
इत्युक्त ऋषिणा देवो महादेवो ममेप्सितम्
एवमस्त्विति देवेशस्तं वरं वृणुयाद्वरम्
ब्रह्मास्त्रग्रसनं श्रुत्वा दण्डाग्रेरुन्धती पतेः
ब्राह्मण्यं वर्धते तस्य पूर्वपक्षे शशी यथा
अन्यां गतिं गमिष्यामि स्वस्ति वोऽस्तु तपोधनाः
शेपुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि
तस्माद्गुरुषु नावज्ञा कार्या भूतिमिहेच्छता
रुष्टे शिवे गुरुस्त्राता गुरौ रुष्टे न कोऽपि हि
इक्ष्वाको स्वागतं वत्स जानामि त्वां सुधार्मिकम्
शरणं ते भविष्यामि मा भैषी रघुपुङ्गव
पूर्वमेव वरो दत्तो मया तुभ्यम्महीपते
तदिदं साधयिष्यामि दुर्दशायामिहाधुना
त्रिशङ्कोः कारयामास वेदारण्ये महाक्रतुम्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वर्लोकात्पतितं दृष्ट्वा त्रिशङ्कुं कोपदूषितम्
सृजं दक्षिण मार्गस्थान्सप्तर्षीनपरान्पुनः
19 a नक्षत्रमालामपरामसृजत्कोपमूर्छितः
अन्यमिन्द्रं करिष्यामि लोको वास्यादनिन्द्रकः
इति संकल्पमकरोन्मदनुग्रहवैभवात्
उमा ——
श्रूयतां देवदेवेश विश्वामित्राय धीमते
दत्तं स्वाश्रमपरं विनाकुचक्षुराननम्
महेश्वरः ——
श्रूयतां देवि वक्ष्यामि पुनस्स्वर्गस्य कारणम्
पद्मयोनि पुरा लब्ध्वा स्रष्टृत्वं मत्सकाशतः
लोकान्सृष्टत्संकल्पात् वीक्षणात्पूर्वहेतुतः
अहमेव परो लोके पदार्थानि पृथक्पृथक्
सृष्ट्वा ऋक्षाणि गगने वैश्वानरपथाद्बहिः
अवाक्शिरास्त्रिशङ्कुश्च तिष्ठत्वमरसन्निभः
उमा ——
वेदे स्मृतिषु सर्वत्र ब्राह्मणस्यैव याजनम्
शिष्टास्त्रे वर्णिका याज्या कथमेतेन कारितम्
महेश्वरः ——
शृणु देवि प्रवक्ष्यामि विश्वामित्रस्तु संभवम्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रजापतिसुतश्श्रीमान्कुशो नाम महीपतिः ।

कुशस्य पुत्रो बलवान्कुशनाभस्सुधार्मिकः ।

कुशनाभसुतश्श्रीमान्गाधिरित्येव विश्रुतः ।

२० अनपत्यो गाधिराजा नाम्ना सत्यवतीं सुताम् ।

ऋचीकऋषये प्रादात्कुलस्य त्राणकारणात् ।

सोऽपि पुत्रार्थमग्नाविष्टिमारब्धवान् विभुः ।

पात्रे निधाय हविषा द्वितयं पुत्रसम्भवम् ।

कृपीडयोनावजुहोदेकं पुत्रस्य सम्पदे ।

हुत्वा शेषं यज्ञपत्न्यै अन्यदा तु मैच्छत ।

नष्टं हविरुपमालोक्य ऋषिः पत्नीमवैक्षत ।

सापि भर्तुः पदे गृह्य प्रणनाम भयातुरा ।

स्त्रीबुद्ध्या साहसमिदं कृतमेका हठात्प्रभो ।

अनपत्या हि मे माता तस्यापत्यस्य कारणात् ।

दत्तं मया साहसेन मन्त्रितं हविरुत्तमम् ।

प्रसीद मह्यं दयया भर्त्तां रक्षस्व मत्प्रभो ।

इत्येवं प्रार्थितः पत्न्या कौशिक्या भगवान् विभुः ।

कृपां चकार दयया सोऽपि ब्राह्मणतां व्रजेत् ।

इत्याभाष्य प्रियां विप्रः क्रतुशेषं समापयत् ।

उमा——

एतादृशगुणोपेतऋषिः कौशिकनन्दनः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अयाज्ययाजको श्राद्धमकरोत्तद्दहस्व मे

महेश्वरः — —

स त्रिशङ्कुः पूर्वमभूद्धर्मेयं कल्पमास्थितः

पितुश्शापात्परितोषेण गुरोर्दोग्ध्रीवधेन च

अप्रोक्षितोपयोगाच्च त्रिविधोस्य व्यतिक्रमः

20 a एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महर्षयः

प्रयुञ्जते शब्दजालं त्रिशङ्कुपदवाचकम्

यौवनस्थस्सती भार्यां न व्रजेद्यदि मानवः

स जीवन्नेव चण्डालो न मृतान्नैव मुक्तवान्

ब्राह्मण्यां यो नरो मौढ्याद्ब्राह्मणीं काममोहितः

न परिग्रहेत्

यदि गृह्णीत मूढात्मा चण्डालत्वं स गच्छति

गत्वा तु मातरं मर्त्यस्स्नुषां भ्रातृव्रजनां तथा

पुत्रीं वा भगिनीं मौढ्याद्व्रजेद्यः काममोहितः

सजीवन्नेव चण्डालमाशु गच्छति सान्वयः

उमा —

इदानीं गुरुणा शप्तः कथं भाव्यो भवेद्वै

चण्डालप्रोक्षितं दुष्टं स्मृतं कर्मान्तरादिके

तत्सर्वं निष्फलं प्राहुर्मुनयस्तत्त्वचिन्तकाः

महेश्वरः —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रिशंको

शृणु देवि प्रवक्ष्यामि त्रिशंको र्यजनं प्रति ।
पुरा त्रिशङ्कुर्गुरुणा पितृशोकाच्च तापितः ।
तस्य शापापनोदार्थं मुनिभिस्सूक्ष्मदर्शिभिः ।
त्रिषड्वारं षडब्दाख्यं कृच्छ्रं कृत्वा विधानतः ।
ततस्स्नानं समादाय शिवनिर्णेजने जले ।
2। शिवक्षेत्रे शिवं पूज्य तीर्थेषु च निमज्य च ।
शुद्धदेहे महीपाले ह्ययजत्क्रतुसत्तमैः ।
अबालको देवलोको न क्षत्रः ग्रामयाजकः ।
कर्मचण्डालका ह्येते महापातकपञ्चमाः ।
गुरुद्रोहवशाज्जाता कर्मचण्डालता मयम् ।
तस्मात्कृच्छ्रादिचरणाच्छुद्धिर्नान्यस्य कस्यचित् ।
तद्वत्पूतं कारयित्वा यज्ञं कौशिकनन्दनः ।
त्रिशंकोः कारयामास शास्त्रदृष्टेन वर्त्मना ।
अनागतान्दिविषदान्प्रेक्ष्य क्रोधानलोज्ज्वलः ।
स्वर्लोकं प्रापयामास स्वकीयतपसः फलात् ।

उमा —

स्वर्लोकात्पतनः कस्मात्प्रायश्चित्तगतैनसः ।
तन्ममाचक्ष्व देवेश यमान्तक पुरान्तक ।

महेश्वरः —

प्रायश्चित्ते कृते पुंसामेनसां ~~मेनसां~~ नाशयिष्यते ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भूलोकशुद्धिर्नास्त्येव शुद्धिरस्यात्पारलौकिकी
तस्मात्त्वद्देहयुक्तत्वात्पातयन्ति स्म भूतले

उमा——

अशुद्धो यदि भूपालस्तस्मिन्प्रेम कथं मुने:
इति पृष्ट: कथामध्ये प्रोवाच कृपया शिव:
तप: कर्तुमना देवि विश्वामित्रऋषि: पुरा
भार्यां त्रिशङ्कोर्निकटे निधाय तपसे गत:
सिद्धे तपसि राजानं प्रीतो भूत्वाधिनन्दन:
21 a वरं ददामि गृह्णीष्व भार्याभरणतोषित:
समाकर्ण्य ऋषेर्वाक्यं राजा प्रोवाच गाधिजम्
मास्त्विदानीं परगुरो आपत्काले तथाकुरु
(.. तस्य) प्रार्थितो राज्ञा इदानीं च पुन:पुन:
दयां चकार राजानं चण्डालाकाररूपिणम्

उमा——

ये दूषयन्त्यदूष्यं मान्तप उग्रं समास्थितम्
भस्मीभूता दुरात्मानो भविष्यन्ति न संशय:
अद्य ते कालपाशेन गता वैवस्वतक्षयम्
इत्या(दि) नाकानिकरं प्रोक्ता सदसि कोपन:
विरराम महातेजा ऋषिमध्ये महामुनि:
इत्यादिनानाकथना दृष्ट्वा हत्या ऋषे: कथम्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नासीत्कथं तत्र भवान्कर्तुमर्हसीति

महेश्वरः—

पुरा कदाचिद्धि जाते मित्रावरुण संभवः

रघोः पुत्रं कुशाध्यर्ध्यं सौदासमशपद्रुशम्

कल्माषपादस्संशप्तः प्रवृद्धः पुरुषादकः

अभवद्भूपतित्वेऽपि मद्यान्हि नरभोजनः

विश्वामित्रऋषिः काल्ये कालेन त्वां पुरं व्रजेत्

तमस्मरन्महातेजास्सौदासं पुरुषादकः

आगतस्मरणादेव निकटं गाधिनन्दनः

22 तं प्रे . . ष्यं वासिष्ठान्हन्तुमुद्यतम्

भक्षितास्तेन राज्ञा ते भस्मीभावं गताः पुनः

अम्बरीष इति ख्यातो यष्टुं समुपचक्रमे

एतत्सर्गं सदा शृण्वन् ब्रह्महा मुच्यते द्रुतः

.. कस्य कथां शृण्वन् यो वा को वा महेश्वरी

पुत्रविक्रयजाद्दोषात्तथा पुत्रार्पणायतः

विमुक्तः स्यरा लोके श्रीरामस्य प्रसादतः

ऋग्वेदसिद्धे ह्ये गाधे तृतीयाष्टकस्योदितः

प्रयुञ्जानो नरो नित्यं भवाब्धेर्विमुच्यते

ऋणबन्धाद्विमुक्तास्स्युर्व्याधिबन्धात्तथैव च

तथैव शृङ्खलाबन्धान्मुच्यते श्रवणादिह

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विश्वामित्रो महान्भूयस्तपस्तेपे महामनाः ।

ततः कालेन महता मेनका परमाप्सराः ।

तात्पर्यवर्णकमिदं गायत्र्यास्सर्वकामदम् ।

शृण्वतां सर्वपापघ्नं सर्वपापहरं परम् ।

अहोरात्रापदेशेन गतास्संवत्सरा दश ।

अब्भक्षो वायुभक्षो वा जीर्णपर्णाशनोऽपिवा ।

स्त्रीणां समक्षे वक्तव्यं न कदाचिन्महेश्वरि ।

~~वद्द~~ वरदानं विश्वयोनेस्तपःफलनिकीर्षया ।

शृण्वतां निष्फलं यान्ति पापानि त्रिदशेश्वरि ।

२२ a ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथा पुरा ।

उमा —

अश्रद्धा ब्राह्मणो वाक्ये किं कृतं गाधिसूनुना ।

महेश्वरः —

मया यज्ञमुपक्रान्ते त्रिशङ्कोर्यागकर्मणि ।

वासिष्ठा दूषयन्तिस्म कथं सदसि देवताः ।

तान्हन्तुं प्रेषितः पूर्वं क्रुद्धः कल्माषपादकः ।

भक्षितास्तेन राज्ञा ते भस्मीभावं गताः पुनः ।

तान्दृष्ट्वा भक्षितान्राज्ञा मित्रावरुणसंभवः ।

पुत्रशोकाभिभूतस्तु प्रलापं भृशार्दितः ।

प्रज्ञामवष्टभ्य ज्ञानैः पूर्ववत्तपसि स्थितः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सोपीदानीं मदूष्यम्मामुग्रे तपसि संस्थितम् ।
इत्युक्तो भारतीनाथः प्रोवाचारुन्धतीपतिम् ।
ब्रह्मर्षित्वं वदानेन तपसा तोषितो भवान् ।
ब्रह्मर्षिस्त्वं न सन्देहस्सर्वं संपाद्यते तव ।
विश्वामित्रस्तुतिं शृण्वन्शतानन्देन भाषिताम् ।
पुष्कलं ब्राह्मण्यमासाद्य ब्रह्मलोके महीयते ।
दक्षयज्ञवध्ये पूर्वं धनुराधाय वीर्यवान् ।
विध्वंसस्य त्रिदशाञ्शापात्सलीलमिदमब्रवीत् ।
प्रसादयन्ति देवेशन्नमस्ते रुद्रमन्यवे ।
हे रुद्र धन्वुषस्तुभ्य मुतोत इषवे नमः ।
बाहुभ्यान्ते नम इति स्तुतिभिश्श्रुतिचोदितैः ।
प्रसादितो महादेवः प्रसादमकरोच्छिवः ।
२३ भूतलादुत्थिता सा तु व्यवर्धत ममात्मजा ।
भूतलादुत्थितां देवीन्नारायणकुटुंबिनीम् ।
राजानो बहुवीर्याढ्या वारयामासुरादरात् ।
प्रत्याख्याता भूपतयस्तृणतप्रवणाच्छकात् ।
अरुन्ध मिथुलां सर्वे वीर्यसन्देहमागताः ।
तस्माद्विशिष्टं यन्दस्तु न धार्यं धीमता क्वचित् ।
धृते तु प्राणहानिस्स्यात्स्यमन्तकमणिर्यथा ।
यथा पीयूषसंरक्षा यथा द्रुपदजास्थितिः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्माच्छेद्गुणोपेतं न धार्यं वस्तु मानवैः ।
नभग्न तद्धनुर्मध्ये नरश्रेष्ठो महायशाः ।
गृहीते रघुनाथेन महादेवशरासने ।
शक्तिस्तु वैष्णवं प्राप्ते तस्मा भग्ना महेशितुः ।
तस्मिन्नवसरे पाशी वैष्णवं धनुरुत्तमम् ।
दत्तवान्कोसलेन्द्रस्य करे प्रीतिपुरस्सरम् ।
तद्धनुर्वरुणाभ्यर्णे पुनः प्रत्यर्पयाच्छिवे ।
राज्ञां वंशानुकथनं शृण्वतां पापनाशनम् ।
श्रुत्वा गोदानकथनं गोदानफलमाप्नुयात् ।
प्रपामध्येत्युपक्रम्य जानक्या मङ्गलोत्सवम् ।
23 a श्रुत्वा विवाहं कुर्वीत पत्नी दीर्घायुषी भवेत् ।
दंपत्योस्सततं प्रीतिर्वर्धते नायके वयः ।
तस्मात्कल्याणसमये श्रोतव्यं श्रुतिमिच्छता ।
गोदानं भूमिदानंच कन्यादानं तथैवच ।
आत्मनाश्रीयमन्विच्छन् प्रयच्छेत्सर्ववर्णकः ।
तस्माद्विवाहं प्रेक्षेत आत्मनाश्रीयमिच्छुभिः ।
सर्वोत्सवे तु कल्हारो मधूकस्तु स्वयंवरे ।
सीमन्ते गर्भिणी नारी यनाङ्कुरमयी भवेत् ।
धार्या तु प्रेतकार्ये वै माला नकदानिर्मिता ।
सीतायै प्रददौ रत्नं कौसल्या वारिसंभवम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तया भूषितगात्रा सा शुशुभेन्दीवरेक्षणा ।

भार्गवं जामदग्न्यं च राजराजनिमर्दनम् ।

इत्यादिश्रवणात्पुंसां ब्राह्मन्तेजोऽभिवर्धते ।

शितिकण्ठस्य विष्णोश्च बलाबलपरीक्षया ।

अभिप्रायन्तु विज्ञाय देवतानां पितामहः ।

विरोधं जनयामास तयोस्सत्ववतां वरः ।

आधिक्यं मेनिरे विष्णुं देवा ऋषिगणास्तदा ।

उमा——

त्वत्तो विशिष्टभावस्तु विष्णोस्संप्रति गण्यते ।

24 कथमेतद्दयासिन्धो कृपया वद सुव्रत ।

महेश्वरः——

शृणु देवि प्रवक्ष्यामि विष्णोराधिक्यतां प्रति ।

पुरा कदाचिद्देवेशि परमानन्दकानने ।

क्रीडासक्ते मयि तदा विश्वमेतदनायकम् ।

उपद्रुतं सदा दुष्टैर्वेदबाह्यैर्बहिष्कृतैः ।

स्वाहास्वधावषट्काररहिते कर्मवर्जितैः ।

ब्रह्मणा ज्ञातवृत्तान्तः कार्यशेषमचिन्तयम् ।

चक्रपाणिं समाहूय रत्नसिंहासने शुभे ।

अभिषिच्य वरान्दत्वा प्रणामं करवं प्रिये ।

सृष्टिस्थितिविनाशानां कर्तृत्वमकृतो ऽयम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वज्ञतादिसिद्धिं च दत्तवानस्मि निर्वाणे ।
मत्तोऽधिको भवानाजौ भव निर्वाणो कम्पितः ।
इति दत्त्वा वरान्पूर्वं वाराणस्यां हरिः पुरा ।
इदं ज्ञात्वा कविः प्राह मेनिरे श्रीपतिं प्रिये ।
शरश्च प्रतिसंगृह्य हस्तात्कुपराक्रमः ।
आरोप्य धनुषि रामस्सशरं सन्निकर्षह ।

उमा —

निर्वीर्यो जामदग्न्योऽसौ रामो राममवैक्षत ।
24 a इत्युक्तं ऋषिणा काव्ये निर्वीर्यत्वं ऋषेः कथम् ।

महेश्वरः —

जामदग्न्यावतारोऽयं हरेरंशमात्रकः ।
पूर्णावतारमालोक्य शक्तिस्संक्रमिता भवत् ।
रात्रौ दिवाकरं तेजो निहितं हव्यवाहने ।
प्रातस्सूर्ये यथा गच्छेद्वह्निरह्नि यथा पुरम् ।
कौसल्या च सुमित्रा च कैकेयी च सुमध्यमा ।
वधूप्रतिग्रहे युक्ता याश्चान्या राजयोषितः ।
इत्यादिश्रवणात्स्त्रीणां स्नुषाभ्युदयकरं भवेत् ।
स्नुषास्स्युः पतिमातॄणामिष्टाः प्रीतिपुष्कलाः ।
काण्डान्तं भावयेद्वापि शृणुयाद्वा नरर्षभः ।
उपेत्य भार्यां हर्षाच्च रमते प्रीतिपूर्वकम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

काण्डान्ते ब्राह्मणाः पूज्याः पूज्यस्सीतापतिः प्रभुः ।
सीतासमेतप्रतिमा राघवस्य मनोरमाम् ।
चतुर्विंशत्पलैः कृत्वा तदर्धैः पादसंमितैः ।
जाम्बूनदैस्समाराध्य दद्याद्विद्द्विजन्मने ।
निधाय पूर्णकलशे क्षौमोपरि शुचिस्मिते ।
सहस्रसम्मितैर्वित्तैस्तदर्धैः पादमात्रकैः ।
यथाशक्तिप्रमाणेन वित्तशाठ्यविवर्जितः ।
25 दक्षिणासहितं दद्याद्वाञ्छितार्थसुसिद्धये ।
धरणीगर्भसंभूते धरणीधरवल्लभे ।
धरणीमिमे प्रयच्छाशु प्रीता भव शुचिस्मिते ।
कौसल्यागर्भसंभूत भूभारोद्धारणप्रभो ।
प्रतिमादानतुष्टस्सन् वाञ्छितार्थसुसिद्धये ।
वक्ता प्राङ्मुख आसीत श्रोता चोत्तरदिङ्मुखः ।
नित्यं द्विजान्समाराध्य यथाविभवविस्तरम् ।
विष्टरं मारुतेः कृत्वा भक्ष्यैर्भोज्यैश्च पूजयेत् ।
दत्वा ताम्बूलमतुलं शृणोतु सुखतुष्टये ।
हविष्याशी स्वयं भूयाद्भार्यया नियतात्मवान् ।
वक्तुर्मुखं समालोक्य शृणुयात्कार्यसिद्धये ।
वक्तारं रामबुद्ध्या तु पूजयेन्वहं प्रिये ।

इत्युमासंहितायां रामायणकथाफलप्रस्तावे बालकाण्डकथाफल-
वर्णनं नाम (षष्ठोध्यायः) ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

2

महेश्वरः —

सहदेवैरुदीर्णस्य रावणस्य वधार्थिभिः
अर्थितो मानुषे लोके जज्ञे विष्णुस्सनातनः
विशेषणं हरेश्शृण्वन् क्वचित्स्कन्धान्वयं तथा
क्वचिद्रूपकथनं क्वचिज्ज्ञान प्रदर्शनम्
यो नित्यं शृणुयाद्वापि श्रावयेद्वा समाहितः
25a सर्वबन्धविनिर्मुक्तो हरिमन्दिरगो भवेत्
पट्टाभिषेकसंभारान्वसिष्ठेन प्रचोदितान्
सौवर्णादीनि रत्नानि बलीन्सर्वौषधीरपि
इत्यादीनि सदा शृण्वन् प्रातःकाले महीपतिः
स्थिरं राज्यं समासाद्य प्रियपुत्रैश्च मोदते
विप्रोषितश्च भरतो यावदेव पुरादितः
तावदेवाभिषेकस्ते प्राप्तकालो मतो मम
कामं खलु सतां वृत्ते भ्राता ते भरतस्स्थितः
ज्येष्ठानुवृत्ती धर्मात्मा सानुक्रोशो जितेन्द्रियः
किन्तु चित्तं मनुष्याणामनित्यमिति मे मतिः
ज्येष्ठस्य राजता नित्यमुचिता हि कुलस्य च (ल)
इति प्रोवाच भरतस्सर्वान्पौरजनान्प्रति

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तादृशो को विचारोऽस्ति स्वच्छचित्तस्य भूपते:

महेश्वर :——

शृणु वक्ष्यामि तत्वेन राजा पङ्क्तिरथाह्वय:
हृदि शङ्कान्निधायैव गिरिव्रजपुरं प्रति
भरतं प्रेषयामास राजा दशरथस्सुतम्
कन्याम्मनोज्ञामाकर्ण्य केकयारण्यस्य भूपते:
गत्वा तां वरयामास पत्न्यर्थं केकयाधिप:
सोऽपि वव्रे वरं राजा दास्यामि तव कन्यकाम्
26 अस्यामुत्पत्स्यते योऽसौ स तु राजा विधीयताम्
तथास्त्विति प्रतिज्ञाय गृहीता केकयात्मजा
तस्यामुत्पादित: पुत्रो भरतो नाम विश्रुत:

उमा—
राज्ञो दशरथस्यास्य मृषावादित्वमागतम्
प्रतिज्ञाकम्पनं राज्ञ: कारणं हि तया भवेत्
केकयाधिपतेश्चापि तत्पुत्र्या: कारणान्तरे
कैकेय्या ग्रहणेऽपि तस्यास्सारथ्यकर्मणि ?

महेश्वर: ——

विवाहसमये राज्ञा प्रतिज्ञातमिदं शृणु
पट्टाभिषेकसमये भवेयं स्मारितो यदि
त्वया वान्येन भूपाल तथा चेत्करवाण्यहम्
इत्थं प्रतिज्ञामकरोत् पपात ग्रहणे नृप:

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रणमन्तं समुत्थाप्य तं परिष्वज्य भूमिप:
तस्मात् पित्रोर्नमस्कारस्साष्टाङ्गश्श्रुतिचोदित:
विना साष्टाङ्गमन्येन कुर्वन्नरकमश्नुते
देवर्षि पितृविप्राणां मनूणोस्मि तथात्मन:

उमा ——

जायमानस्य विप्रस्य ऋणानां त्रितयं सह
26 a क्षत्रियाणां विशांचैव कथं वेदविना कृतम्
मङ्गलं प्राप्यते मर्त्यश्श्रुत्वा साकेतवर्णनम्
गुरुमान्जायते मर्त्ये गुरुपूजाविधिश्रुतौ
ध्यायन्नारायणं देवं स्वास्तीर्णे कुशसंस्तरे
ब्राह्मणानां शिवो ध्येय: क्षत्रियाणां हरिस्स्मृत:
हिरण्यगर्भो वैश्यानामुपस्यकथ्यदृशास्मृत:
इति श्रोतायि तुं रामस्स्वात्मानमनुसन्दधे
कुब्जा दैवैस्समादिष्टा कैकेयीं श्रेतुमारभत्
बाल्य एवहि मा तुल्यं भरत:प्रापितस्त्वया
सन्निकर्षाच्च सौहार्दं जायते स्थावरेष्वपि
तस्मात्समक्षे वस्तव्यं स्वस्य भूमिमभीप्सत:
आसन्नं भजते नारी आसन्न: परिपूज्यते
आसन्नं भजते राजा आसन्नं भजते लता
स्त्रीणां कौटिल्यमार०याने शून्यालंकारवर्णनात्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवि केनाभियुक्तासि इत्यादि ग्रन्थविस्तरैः ।
कामाचारो भवेत्कामो वृद्धानां*यूनि काकथा ।
कामातुराणां भूलोके अदेयन्नास्ति कुत्रचित् ।
शपेतेजीवनार्हेण इति शापं वृथां नृपः ।
सत्येनापि शपेद्यस्तु देवगुर्वग्निसन्निधौ ।
27 तस्या वैवस्वतो राजा धर्मस्यार्धं निकृन्तति ।
एवं स्थितोपि राजर्षिः कामबाणेन पीडितः ।
अशापद्राममुद्दिश्य पाशबन्धमृगान्वितः ।
सत्येन लोकाञ्जयति दीनान्दानेन राघवः ।
गुरूञ्छुश्रूषया वीरो धनुषा युधि शात्रवान् ।
सत्यन्दानन्तपस्त्यागो मित्रता शौच्यमार्जवम् ।
विद्याञ्च गुरुशुश्रूषा [illegible] ध्रुवाण्येतानि राघवे ।
हरिश्चन्द्रस्तु सत्येन शिबिर्दानेन भूतले ।
कोदण्डेनार्जुनश्शत्रून् रघुश्शुश्रूषया गुरून् ।
विश्वामित्रस्तु तपसा आर्जवेन युधिष्ठिरः ।
जनको विद्यया चापि एकैकगुणयोगतः ।
लोकानां विजयं कृत्वा प्रसिद्धा अभयन्नृपाः ।
ध्रुवाण्येतानि राजेन्द्र राघवे तु कृतकेतनाः ।
रामोपि भरताद्भूयः तव शुश्रूषते सदा ।
बह्वीनामेकभार्येणामेका पुत्रवती यदि ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वास्तास्तेन पुत्रेण पुत्रवत्यः प्रकीर्तिताः ।
यथा मातरि शुश्रूषां विदध्यादौरसस्सुतः ।
तद्वन्मातृसपत्न्यां तु ऐहिकं पारलौकिकम् ।
अनार्य इति मामार्याः पुत्रविक्रयिणं ध्रुवम् ।
27a धिक्करिष्यन्ति रथ्यासु सुरापं ब्राह्मणं यथा ।
पुत्रस्य विक्रयं कुर्यान्नद्या द्रव्यलोलुपः ।
द्रव्याद्यदि नरो लोभात् पुत्रं दद्यात विक्रयी ।
ब्राह्मणोन्न सुरापेया गोघ्नाद्याः पापकारिणः ।
सुरापं ब्राह्मणं दृष्ट्वा कुलत्यागो विधीयते ।
पुत्रं वा जननवेलायां शङ्खचक्रगदाधरम् ।
दृष्ट्वा तुष्टाव बहुधा काश्यपत्नात्स्वयं नृपम् ।
तन्मया मोहितो भूत्वा भक्त्या राममनुस्मरन् ।
मास्म मे भरतः कार्षीत् प्रेतकृत्यं गतायुषः ।
इत्यादि प्रलपन्राजा कैकेयीवरमोहितः ।
श्रुत्वा विचित्रं करुणं विलापं
भर्तुर्नृशंसा न चकार वाक्यम् ।
देवैस्संप्रार्थितो देवी मायाविश्वंभरस्य तु ।
केकयापत्यवादेन जाता विश्वरस्य गुप्तये ।
सा मया भेदयामास राजानमकुतोभयम् ।
चतुरश्रो रथश्रीमान्नित्रिंशो धनुरुत्तमम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वाहनन्नरसंयुक्तञ्छत्रञ्च शशिसन्निभम् ।
तुरीयं वर्णकमिदं ब्रह्मविष्णुशिवात्मकम् ।
भजतां सर्वदोषघ्नं सर्वसंसारभयनाशनम् ।
तुष्टिदं पुष्टिदं चैव सर्वैश्वर्यप्रवर्तकम् ।
रामाभिषेकसंभारां धृत्वा मङ्गमाप्नुयात् ।
२८ राज्यं द्विजातिभिर्जुष्टं राजसूयाभिषेचनम् ।
कर्तुमर्हति ते राजा वासवस्येव लोककृत् ।
इमं मन्त्रं ~~सु~~ समुच्चार्य प्रेषयेद्दूरगं प्रियम् ।
सर्वान्कामानवाप्यैव पुनर्बन्धेषु युज्यते ।
पुर्व (पूर्वां) दिशं वज्रधरो दक्षिणां पातु ते यमः ।
वरुणः पश्चिमामाशां धनेशस्तूत्तरां दिशम् ।
सीताकवचयुक्तां गो यां यां याति दिशं प्रति ।
तान्तान्कामानवाप्यैव लभते शाश्वतं पदम् ।
यश्च रामन्न पश्येत्तु यञ्च रामो न पश्यति ।
निन्दितस्स भवेल्लोके स्वात्माप्येनं विगर्हते ।
रामं वा रामकेरं वा रामनामान्यथापि वा ।
वीक्षेत शृणुयाद्वापि स नरो मुक्तिभाग्भवेत् ।
यज्ञैर्दानैस्तपसा नाशनेन लब्ध्वा विष्णोरव्ययस्य
प्रसादम् ।
लब्ध्वा साक्षा~~द्ब्रह्म कृ~~ च्छाश्वतं ब्रह्म कृच्छ्रात् मोक्षं
देवी कांक्षितेऽत्यल्पकालम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रुत्वा लक्ष्मणवाक्यानि कौसल्यारामयोः पुरा ।

२८ a सत्येन धनुषा चैव दत्तेनेष्टेन ते शपे ।

हनिष्ये पितरं वृद्धं कैकेय्या वशमागतम् ।

इत्यादि श्रवणात्पुंसां क्षात्रं तेजोऽभिवर्धते ।

त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ।

पितुर्नियोगे स्थातव्यमेष धर्मस्सनातनः ।

अत्रेतिहासं वक्ष्यामि पावनं पूर्वसंभवम् ।

अवन्ती विषये कश्चित् किरातान्वयसंभवः ।

धर्मव्याध इति ख्यातः पित्रोः पूजापरायणः ।

आपणस्थं सदा मासं (मांसं) क्रीत्वा क्रयणतत्परः ।

क्रयलब्धैर्वसुद्रव्यैः पितृपूजापरो भवत् ।

अभ्यज्य पितरौ नित्यं स्नापनं चोष्णवारिणा ।

कृत्वा सुभोज्यं भोज्यान्नैर्वीटिकार्पणपूर्वकम् ।

मञ्चे निधाय पितरौ कृतपादाभिवन्दनः ।

एवं दिने दिने कुर्वन् व्याधोऽपि स्वर्गमभ्यगात् ।

श्रुत्वा धर्मार्थकामेति धर्मभाजायते नराः ।

श्रुत्वा राघववाक्यानि वनप्रव्राजनं प्रति ।

रामप्रसादमासाद्य रामसायुज्यगामिनः ।

२९ श्रुत्वा लक्ष्मणवाक्यानि राघवेन्द्रस्य सन्निधौ ।

मित्रमभ्यन्तरं लब्ध्वा शत्रूणां विजयं लभेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सन्ति धर्मोपदा कृच्छ्रा धर्मात्मन् किं बुध्यसे
तयोस्त्वच्चरितं स्वार्थं शाठ्यात् परिजिहीर्षतोः
पुरा तु ब्राह्मणः कश्चित् कलिङ्गविषये महान्
श्रुताध्ययनसंपन्नो वेदाध्ययनलंपटः
चूतचारश्चो बहुकालन्तु द्रव्यार्जनपरायणः
प्रतिग्रहाध्यापनया याजकेभ्यो धनार्जनम्

धनेन पूर्णप्रतिलब्धकामः
किञ्चिद्धनं ब्राह्मणसान्नकार्षीत्
धर्मस्य नाशात्पिशुनाश्च चोरा
कुपीडयोर्नृपतिश्च रुष्टः
विनाशयामासुरथास्य वित्तं स वित्तनाशात्परितापि-
तोऽभूत् ॥

धर्मस्य लोपान्मद्वित्तनाशो
बभूव इत्युक्तिपरो द्विजोऽभूत्
धर्मं चरिष्याम इति ब्रुवाणो
वित्तार्जनं धर्ममिषेण चक्रे ॥

२१ a ब्राह्मणान्भोजयिष्यामि तटाकान्खातयाम्यहम्
प्रपाः प्रवर्तयिष्यामि करिष्ये देवपूजनम्
तद्द्रव्येणाकरोत्स्वस्य संसारपरिपूरणम्
किञ्चिद्धर्मं ह्ययं चक्रे नान्ये ह्वारयन्ति ते मम

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

परार्थे धर्मकर्तारो धर्मविक्रयिणस्तथा ।
मतङ्गा भविष्यन्ति पिशाचा वा न संशयः ।
एतादृशा महीदेवा क्षत्रविट्शूद्रजास्तथा ।
इति रामेण कथितं प्रिये प्रोक्तं मयाधुना ।
शृणुष्वापरमाख्यानं स्वर्गस्यास्य पुरातनम् ।
पुरा कश्चिन्महीपालः कुन्तीभोज इति श्रुतः ।
पृथिवीं पालयामास क्षत्रधर्ममनुस्मरन् ।
तादृशस्य महीभर्तुः राजानः परिपंथिनः ।
न्यरुन्धन्तस्य नगरं चतुरङ्गबलैर्युताः ।
निरुद्धं नगरं वीक्ष्य हेहयैस्तालजंघजैः ।
युद्धाय कृतसन्नाहो रथादिबलसंयुतः ।
पुरान्निर्गत्य स बहु कृतवाञ्जन्यमुत्तमम् ।
नष्टेषु द्रव्यजातेषु भग्नेषु गजवाजिषु ।
पुरमागम्य भूपालः किं कार्यमिति चिन्तयन् ।
चिन्ताविष्टं नृपं प्राह पुरोधाः कार्यसाधकः ।
राघवेन्द्रे वनं गन्तुं पित्रादिष्टे कृतत्वरे ।
कौसल्या कारयामास पुत्रमङ्गलवाचकम् ।
तदिदानीं प्रयुञ्जानो युद्धं कुरु यथाबलम् ।
ब्राह्मणान्समुपाहूय स्वस्तिवाचनपूर्वकम् ।
हुत्वा वैष्णवमन्त्रैश्च कृत्वा ब्राह्मणभोजनम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अभिषेकान्ते विधानेन कृतमङ्गलपूर्वकम्
युद्धं कुरु महाबाहो शत्रुञ्जेष्यसि मा चिरम्
इत्युक्त्वा कारयामास द्विजैश्च स्वपुरोहितैः
स्नापनीयं तमायासमुपस्पृश्य जलं शुचि
चकार माता रामस्य मङ्गलानि यशस्विनी
इत्युपक्रम्य मङ्गलस्य जगामेत्यन्तमाहितः
ब्राह्मणैर्वाचयामास विजयार्थं नृपस्य च
युद्धाय कृतसन्नद्धो निर्जगाम पुरोत्तमात्
हैहयैस्तालजङ्घैश्च युद्धमासीत्कृतारवम्
प्रवृत्ते घोरतासि बाणासार प्रपीडितम्
भग्नं राजकुलं सर्वं विद्रुतं सर्वतो दिशम्
क्षणमात्रेण तेष्वेको न दृश्यत भूतले
प्रयाणसमये जप्त्वा तु कार्यसिद्धिर्भविष्यति
देशान्तरगतानां च पुनरावृत्तिसिद्धिदम्
व्रतोपवासरतया भवितव्यं त्वया नये
30 a इत्यादिग्रन्थसन्दर्भैः स्त्रीधर्मं प्राह राघवः
प्रोषिते नायके स्त्रीभिर्हरिद्राकुङ्कुमं तथा
कञ्चुकी कङ्कणं वापि न धार्यं भूतिमिच्छतीः
केशसंस्कारकरणं चित्राणि वसनानि च
आर्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वानि पुण्यानि भुञ्जाना स्वं स्वं भाग्यमुपासते ।
भर्तृभाग्यं तु भार्यैका प्राप्नोति पुरुषर्षभ ।
अतश्चेत्यादि सन्दर्भैस्सीता प्रोवाच राघवम् ।
अत्रेतिहासं वक्ष्यामि शृणु पार्वति तत्वतः ।
नलो नाम पुरा राजा चक्रवर्ती नरर्षभः ।
पृथिवीं पालयामास यथाशास्त्रं यथामति ।
तस्य दैववशाद्द्यूते प्रवृत्तिरुपपद्यते ।
कलिना जितसर्वस्वो राज्यभ्रंशमवाप्तवान् ।
तस्याङ्गना तु वैदेही तद्दुःखाद्दुःखिनी भवेत् ।
हरिश्चन्द्रस्य भार्या च भर्तृदुःखमुपेयिता ।
तस्मादहं त्वया सार्धं वनं यास्यामि राघव ।
किं त्वामन्यत वैदेहः पिता मे मिथिलाधिपः ।
रामं जामातरं प्राप्य स्त्रियं पुरुषविग्रहम् ।
31 अत्राहं कथयिष्यामि पुरावृत्तं रघूत्तम ।
पुरा नरपतिः कश्चिद्दरक्षादवनीमिमाम् ।
स्वर्धुनीतनये राज्ञो पराजयमवाप्तवान् ।
गाङ्गेयं हन्तुकामोसौ शिवाराधनको भवत् ।
सिद्धे तपसि तं प्राह शंभुर्गङ्गाधरस्स्वयम् ।
भो भो नरेन्द्र किं कार्यं तपश्चरसि खेदितः ।
इत्युक्तः प्राह भूपालः परमानन्दनिर्भरः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भीष्महन्तारमिच्छामि कर्णे कातरो मम ।

इत्युक्ते दत्तवान्देवो निर्मितं भीष्मनाशने ।

कतिचित्कालमासाद्य स्त्रीत्वं पुंस्त्वमवाप्स्यसि ।

इति दत्तवरो राजा पुरमाप कुतूहलात् ।

तस्य भार्या सुतां काले जनयामास सुप्रभाम् ।

राजा शिवस्य वाक्येन पुत्रो जात इति ब्रुवन् ।

जातकर्मादिसंस्कारमकरोत्पुरुषे यथा ।

तामन्तरा तु तनयां शिखण्डीमुदवाहयत् ।

रात्रौ विनोदसमये ज्ञात्वा नारीं शिखण्डिनम् ।

पित्रे संप्रेषयामास शीघ्रं सन्देशहारिणम् ।

श्रुत्वा वृत्तान्तमत्युग्रं चतुरङ्गबलैर्वृतः ।

~~सम्बन्धिनगरं रोषादाक्रम्यातिष्ठदञ्जसा~~ ।

एवं शुश्राव वृत्तान्तं स्त्रियं पुरुषविग्रहम् ।

31 a सीतारापनयोर्वाक्यं ये शृण्वन्ति महीतले ।

तौ दंपती सदा स्वेदात्स्यातां मुक्तौ भवाम्बुधे ।

रामोऽपि वित्तं विप्राणां दत्वा वनगतोऽभवत् ।

लोकान्तरं गन्तुकामैः कालमात्रं च दीयते ।

नव पञ्च च वर्षाणि वनवासं विहृत्यते ।

पुनः पादौ ग्रहीष्यामि प्रतिजानो नराधिप ।

वधये शरक्षयन्नास्ति स्थापिते नास्ति चालनम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(वार्ता)

रामे वर्ता दथं नास्ति मास्ते युक्तरराघव । पि ।

श्रेयसे वृद्धये तात पुनरागमनाय च

गच्छस्वारिष्टमव्यग्रः पन्थानमकुतोभयम्

नैवाहं राज्यमिच्छामि न सुखं न च मैथिलीम्

नैव सर्वानिमान्कामान्स्वर्गं नैव च जीवितम्

इदं प्रोक्त्वा प्रास्थितानां प्रस्थापनविधिर्भवेत्

ते यान्ति सिद्धसंकल्पा इह देहा धनाधिपाः

पुनर्बन्धुसमेताश्च मोदन्ते दिवि देववत्

पूर्णस्य ब्रह्मणो राज्ये इच्छया तस्माद्भियति

लाभालाभे दुःखसुखे कार्याकार्ये प्रियाप्रिये

32 अद्वैते निर्विशेषाख्ये मायालेशो न विद्यते

कैकेयी भर्त्सनं श्रुत्वा वसिष्ठमुनि भाषितम्

नश्यन्ति सर्वपापानि तार्क्ष्यं दृष्ट्वा यथोरगाः

उमा —

एतादृशा स्त्रियस्सन्ति किमन्नलोके द्रोहकारिकाः

भर्तृद्रोहिणी नारी व्याघ्री भवति कानने

भर्तृरत्नेषु भुञ्जाना लंपटेऽप्यनुवर्तिका

कथं द्रोहं प्रकुर्वन्ति स्त्रियकान्ते स्वदैवते

एतद्वाच्यत्व देवेश मम कामप्रपूरक

महेश्वरः —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शृणु वक्ष्यामि देवेशि किञ्चिदाख्यानमुत्तमम् ।
यस्य श्रवणमात्रेण सिध्यन्ति सकलास्स्त्रियः ।
ज्येष्ठा दासीन्नरपति प्रियंवद इति श्रुतः ।
श्रुताध्ययनसंपन्नो महीं धर्मेण पालयन् ।
तस्य भार्याद्वयमभूद्देवी तु सुमुखाभिधा ।
अन्या कनकवर्णाङ्गी धर्मेणोढा भवास्त्रियः ।
ज्येष्ठा प्रसूत तनयं कद्रूं कामाकृतिं शुभम् ।
अन्यात्वजीजनत्पुत्रमम्बुजाक्षोऽपि विश्रुतम् ।
प्रियंवदाख्यो नृपतिरपुत्र तयोः समाः ।
कृत्वा राज्यं जीर्णवपुः पुत्रं राजानमैच्छत ।
प्रकृतीस्सभ्यगाहूय चिन्तयामास वै हितम् ।
32a तस्मिन्नवसरे दूतं ज्ञात्वा राज्ञश्चिकीर्षितम् ।
हेमाङ्गी कथयामास कद्रू राज्यस्य भाविताम् ।
सः पुण्ययोगे ज्येष्ठाया पुत्रं कद्र्वभिधानकम् ।
अभिषेक्ष्यति धर्मेण प्रजापालनकर्मणि ।
इत्युक्ते सुप्रजज्वाल कोपेन ज्वलितानना ।
द्यूतिं कनकवर्णाङ्गी उत्तरं समपृच्छत ।
सा चिन्तयित्वा तां प्राह साहसं परमौषधम् ।
रात्रौ प्रसुप्ते नृपतौ शिरः खड्गेन लावय ।
मृते पितरि राजा तु भविता त्वत्सुतो नवे ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मूलं बलं त्वत्सुतस्य तस्य नास्ति हि कोपि हि ।
तथा प्रबोधिता राज्ञी तथा श्रद्धां चकार वै ।
सिद्धः कश्चिद्ददौ राज्ञे मन्त्रं कम्बलिकां प्रति ।
सा तस्य कर्णे जपति सर्वं वृत्तान्तमादितः ।
अथ वेदितवृत्तान्तः किमेतदिति चिन्तयत् ।
सा निश्चितार्थः पद्धति नानृतं नास्ति कर्हिचित् ।
कूटमभ्यन्तरं शुद्धं शुद्धान्तचरलंपटम् ।
प्राह भृत्यमथाज्ञमो तल्पाधश्शोष्व मे निशि ।
इत्थं शुद्धान्तसञ्चारकुशलं कञ्चन व्यधात् ।
रात्रौ कनकवर्णाङ्ग्या कृतभोगो नराधिपः ।
निद्रावशमगात्स्ताच्च महिषी निद्रिता भवत् ।
पिशाच्या कर्णबोधिन्या बोधितो नृपसत्तमः ।
33 उत्थाय शीघ्रमभ्यर्णे निद्रालुं भृत्यमञ्जसा ।
तल्पे निधाय तस्याधः स्वयं निद्रामुपागमत् ।
एतस्मिन्नन्तरे सापि प्रबुद्धा चिन्तयत्स्वयम् ।
कृत्वा विकोशान्निस्त्रिंशं केशपक्षे परामृशत् ।
स्त्रीबुद्ध्या साहसान्मौर्ख्याच्चिच्छेद शिर उत्तमम् ।
इत्थं प्रज्ञातवृत्तान्तो निशान्ते भूपतिस्स्वयम् ।
शूलाग्रे तां समारोप्य शायिष्ठ सस्वरं सभाः ।
एतादृश्यास्स्त्रियस्सन्ति साहसप्रवशान्विताः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

साकेतपुरनाथस्य पितुर्दशरथस्य च । ।

स्वरूपं दर्शयामास सहस्रार्कसमप्रभम् ।

सहस्रशिरसं नित्यं सहस्राक्षमनामयम् ।

सहस्रबाहुपादोरुं सर्वतस्समवस्थितम् ।

जटां त्रिणेत्रं गङ्गां च बिभ्राणं प्रळयानलम् ।

* शङ्खचक्रञ्च कौमोदीन्नन्दकञ्च कमण्डलुम् ।

पिनाकं धवकं रक्तं कार्ष्ण्यञ्चैव कपर्दधरम् ।

ग्रसन्तं सर्वभूतानि व्यात्ताननामिवान्तकम् ।

दृष्ट्वा रूपं हरेस्तुष्टास्तुष्टाव परमेश्वरम्

मां शिवम् ।

मधुवन्नोजासि तु वाञ्छां कुर्वन्ति सरघा यथा ।

तद्वन्मां ज्ञाततत्वोयं न जहाति कदाचन ।

इति मत्वा स्वयं मायान्ततान नृपमोहिनीम् ।

33 a इयं धार्मिक कौसल्या मम माता यशस्विनी ।

वृद्धा चाक्षुद्रशीला च न त्वां देव विगर्हते ।

मया विहीनां वरद प्रपन्नां शोकसागरे ।

अदृष्टपूर्वव्यसनां भूयस्सम्मन्तुमर्हसि ।

• इत्थं मायामोहितस्तु रामनाथ मतिं दधे । ।

सीता कौसल्ययोर्वाक्यं पातिव्रत्योपदर्शनम् • ।

श्रुत्वा स्त्री प्राप्नुयान्नित्यं पतिशुश्रूषणाफलम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दानवेन्द्रं हतं दृष्ट्वा तिमिध्वजसुतं रणे ।
स शूरः पुरुषव्याघ्रस्स्वबाहुबलमाश्रितः ।
असन्त्रस्थोऽप्यरण्यस्थो वेश्मनीव निवत्स्यति ।

उमा —

अनुक्तो मुनिना क्वापि सिद्धं तत्कथ्यते * कथम् ।
एतद्वाच्य त्वमन्नाथ रघुनाथपराक्रमम् ।

महेश्वरः —

कृतोद्वाहो दाशरथिस्साकेतनगरे मले ।
पितृशुश्रूषणरतो मातृशुश्रूषणे रतः ।
गुरुशुश्रूषणे सक्तः प्रजापालनतत्परः ।
नियुक्तो गुरुणा रामः शिक्षयन्सकलाः प्रजाः ।
दिनान्ते जनकं सर्वं विज्ञाप्यानुष्ठितं महत् ।
34a गृहं प्रविश्य रामस्स सीताया सुखितो भवत् ।
एवं द्वादशवर्षाणि कृतवान्परिश्रमम् ।
तिमिध्वजस्य तनयश्शातमायो महाबलः ।
दण्डकारण्यमभ्येत्य कोसलान्मर्थपीडयत् ।
श्रुत्वा दशरथस्तूर्णं सन्नाहेन समन्वितः ।
चतुरङ्गबलोपेतः पुरात्तूर्णं विनिर्ययौ ।
अक्षौहिणीद्वयोपेतो दण्डकान्प्रत्यपद्यत ।
तिमिध्वजस्य तनयश्शातमायो महाबलः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बलेन महता युक्तो युद्धायाशु विनिर्ययौ
दण्डकारण्यमासाद्य तस्थौ युद्धाय निश्चितः
अन्यमासीन्महाघोरं रक्षसां मनुजां तथा
एतस्मिन्नन्तरे रामो धनुर्निष्पारयन्महत्
ववर्ष शतवर्षाणि रक्षसां प्राणशान्तये
ते भग्नदेहमूर्धानो भिन्नाश्छिन्ना विदारिताः
त्यक्त्वा प्राणानिमदेये योगिमृग्यं पदं गताः
तान्दृष्ट्वा प्राणनिर्मुक्तान् राक्षसान्स तिमिध्वजः
तिमिध्वजसुतो वीरो मायां प्रार्तयद्युधि
छन्नमायाबलेनाजौ वीक्ष्य रामो महारणे
मुमोचास्त्रं महावेगं शब्दवेध्याभिधानकम्
तेन संछिन्नहृदयः पपात च ममार च
35 एतस्मिन्नन्तरे देवैः पुष्पवृष्टिरवर्षत
स्रष्टा सर्वस्य लोकस्य रामं प्राह मुदान्वितः
अस्त्रान्ददानि दिव्यन्ते ते यथा लक्ष्मणस्य च
ददामि सर्वदेवानां यथावत्प्रतिभान्तु ते
इति दत्वा वरं वेधास्तत्रैवान्तरधीयत
शान्ते जन्ये दशरथो रामादिसहितो जयी
पुरं प्राप्य मुदा युक्तः परां प्रीतिमवाप्तवान्.
वर्तते चोत्तमां वृत्तिं लक्ष्मणोऽस्मिन्सदानघः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दयावान्सर्वभूतेषु लाभस्तस्य महात्मनः ।

श्रुत्वा देव्याः पञ्चमं वृत्तमेतत्

नाणी शाक्तं प्राप्नुयात्कीर्तिमान्स्त्र ।

अन्ते नाणी ~~लोकनाथं~~ नाथलोकं प्रपद्य

अन्ते लोकं शाश्वतं याति मर्त्यः ॥

इत्युमासंहितायां अयोध्याकाण्डे-

श्रवणफलवर्णनन्नाम

सप्तमोऽध्यायः ॥

·ॐ·

(२)

(॥ अथाष्टमोऽध्यायः ॥)

महादेवः —

गङ्गामध्यगता साध्वी प्रार्थयामास जाह्नवीम् ।

सुराघटसहस्रेण मांसभूतोदनेन च ।

यक्ष्ये त्वां प्रयता देवी नगरीं पुनरागता ।

पायसेन द्विजैः पूज्या क्षत्रियैर्गव्यसर्पिषा ।

वैश्यैः पूज्या माक्षिकेण सुरया शूद्रजातिभिः ।

दर्शादौ षष्ठ्यादि तिथिषु पूज्या शङ्करवल्लभा ।

35a अतिदेशेन नारीणां शूद्रधर्मोऽयमागतः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भरद्वाजो महातेजा ः पूजयामास राघवम्
नानाविधानन्नरसान् वन्यमूलफलाश्रयान्
तेभ्यो ददौ महातेजा वासञ्चैवान्वकल्पयत्

उमा——

मधुमूलफलैर्जीवं हित्वा मुनिवदामिषम्
इति रामेण गदितं जनन्यै गच्छता वनम्
पश्चाद्रामेण कथितं गङ्गासन्तारणात्परम्
तौ तत्र हत्वा चतुरो महामृगान्
वराहमृश्यं पृषतं महारुरुम्
आदाय मेध्यं त्वरितं बुभुक्षिता
वासाय काले ययतुर्वनस्पतिः
फलमूलाशिनौ दान्तौ तापसौ धर्मचारिणौ
इति नानाप्रकारेण संशयो वर्तते मम
छिन्धो तत्संशयं कान्त चारित्रे राघवस्य तु

महेश्वरः——

शृणु देवि प्रवक्ष्यामि संशयं छेदिनी सुव्रते
+ एतत्सर्वमभिप्रेत्य +
नीवारान्नं कचित् दाम ः कचिदामिषभोजनम्
मधुना कचिदाहारं फलमूलैः कचिद्वने
वने निवसता तत्र कृतं रामेण सुव्रते

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एतत्सर्वमभिप्रेत्य मुनिस्तत्पदमङ्गने ।

उमा —

तीर्त्वा हिमोद्भवां गङ्गां रामो लक्ष्मणमब्रवीत् ।

36 जागर्तव्यमतन्द्रिभ्यामद्य प्रभृति रात्रिषु ।

योगक्षेमो हि सीताया वर्तते लक्ष्मणावयोः ।

इत्युक्तं रघुनाथेन गङ्गासन्तारणात्परम् ।

तज्जाग्रतं गुणैर्युक्तं वरचापेषु धारिणम् ।

भ्रात गुह्यर्थमर्थमहं लक्ष्मणमब्रुवम् ।

इत्थं निषादाधिपतिः प्रोक्तवान्भरतं प्रति ।

इत्थं धनुर्धरो भूत्वा उटजद्वारि लक्ष्मणः ।

अतिष्ठत्सर्वमावृत्य इति प्राह महामुनिः ।

इदानीं भण्यते तेन मुनिना लक्ष्मणं प्रति ।

महो निद्रांश्च तन्द्रींश्च प्रसक्तंश्च परिश्रमम् ।

रात्रौ धनुर्धरो भूत्वा रक्षत्यकुलविक्रमः ।

महेश्वरः —

त्रियामायाः तृतीयांशे निद्रां किञ्चित्करोत्यसौ ।

श्रुत्वा वेदवरं काले मुनिवृन्दैस्समीरितम् ।

रक्षसामवकाशोऽस्ति वेदध्वनिनिर्जं भणात् ।

तस्मात्प्रचेतसाप्युक्तं किञ्चिन्निद्राप्रदर्शकम् ।

अथ रात्र्यां व्यतीतायामवसुप्तमनन्तरम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रबोधयामास शनैर्लक्ष्मणं रघुनन्दनः ।
कौसल्या नृपतिं प्राह पुत्रव्यसनकर्शिता ।
भोजयन्ति किल श्राद्धे के स्वानेव बान्धवान् ।
ततः पश्चात्समीक्षन्ते कृतकार्यान्द्विजर्षभान् ।
6a तत्र ये गुणवन्तश्च विद्वांसश्च द्विजातयः ।
न पश्चात्तेऽभिमन्यन्ते सुधामपि सुरोपमाः ।
ब्राह्मणेषु वितृप्तेषु पश्चाद्भोक्तुं द्विजर्षभान् ।
नाभ्युपेतुमलं प्राज्ञाः शृङ्गच्छेदमिवर्षभाः ।
एवं कनीयसा भ्रात्रा भुक्तं राज्यं विशांपते ।
भ्राता ज्येष्ठो वरिष्ठश्च किमर्थं नाभिमंस्यति ।
अत्रेतिहासं वक्ष्यामि शृणु शैलेन्द्रकन्यके ।
पुरा दुर्योधनो नाम राजा धर्मभृतां वरः ।
सूर्यवंशसमुद्भूतो धर्मे सत्ये च निष्ठितः ।
शाण्डिल्याख्यो महातेजाः पुरोधा अभवन्मुनिः ।
तस्यैवं वर्तमानस्य राज्ञो दुर्योधनस्य वै ।
पितुर्दिनं हरिदिने बभूव भुवियोगतः ।
शाण्डिल्यं वरयामास पित्रर्थं ब्राह्मणोत्तमम् ।
एतस्मिन्नन्तरे विप्रो गार्ग्यगण्य इति श्रुतः ।
तं दृष्ट्वा पूजयामास राजा दुर्योधनाभिधः ।
पित्रर्थं प्रार्थयामास विप्रं ब्रह्मविदां वरम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओमिति प्राह राज्ञे तु स्नातुं गोदावरीं गतः ।

चिरायिते वार्षगण्ये राजा चिन्ताकुलो ऽभवत् ।

प्रातः पारणमारभ्यातं द्वादश्यां तत्वदर्शिभिः ।

द्वादशीगुणयोगेन तत्काले हव्यकव्ययोः ।

37 स्मृतिशास्त्रं हृदि दध्यौ शाण्डिल्योक्तमहर्निशम् ।

अनागते वार्षगण्ये श्राद्धं कर्तुमथारभत् ।

निर्वर्त्य पित्र्यं विधिवद् द्वेषरागमनं नृपः ।

प्रतीक्ष्य पारणां कृत्वा जलेनातिष्ठदासने ।

एतस्मिन्नन्तरे वार्षगण्याख्यः कृतमज्जनः ।

अभ्यर्णं भूपतेः प्राप्तः पारणे कृतनिश्चयः ।

तं दृष्ट्वा कृतसत्कारं ब्राह्मणानां महीपतिम् ।

क्रोधेन महताविष्टो व्याहर्तुमुपचक्रमे ।

निमन्त्र्य पित्र्ये मां राजन्नुपेक्ष्यां क्रियते कथम् ।

इति शापं महीपालमवमानं (कृतां) कृथो यतः ।

भूपतिः —

श्रुत्वा शाण्डिल्यवचनं शास्त्रं द्वादशीवासरे ।

इदं कृतं मया विप्र शास्त्रं ते ज्ञापयाम्यहम् ।

एकादशीदिने प्राप्ते अन्ने तिष्ठन्ति पातकाः ।

अन्नाशी पापमश्नाति दद्यान्नान्नं हरेर्दिने ।

अन्नवस्त्ररतो नापि दद्यान्नान्नं हरेर्दिने ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एकादश्यामन्नदाता रौरवं नरकं व्रजेत्
हव्य कव्यानि कर्माणि न दद्याद्धरिवासरे
द्वादश्यामेव कुर्वीत तद्दिनश्राद्धमेव च
प्रातः कालमतिक्रम्य कुर्याच्छ्राद्धादिकं यदि
उपवासोद्भवं पुण्यं न धर्मश्चाधिगच्छति
नाश्नन्ति पितरः कव्यं कालातिक्रमणं यदि
31 a इतिशास्त्रं समालोक्य दत्तं श्राद्धमिह द्विज
नृपेणोक्तमिदं श्रुत्वा कोपेन ज्वलिताननः
तान्त्रिकाणामयं धर्मो वेदनिष्ठैर्बहिष्कृतः
तन्त्रेषु दीक्षितो भूत्वा तन्त्राचाररतो भव
इति शापं नृपे कृत्वा गतवान् स्वस्य चाश्रमम्
हा राघव महाबाहो हा ममायासनाशनः
हा पितृप्रिय मे नाथ हा ममाधिगतस्सुत
इति मातुश्च रामस्य सुमित्रायाश्च सन्निधौ
राजा दशरथश्शोचन् शयानोन्तमुपागमत्
यं भावं हृदि निश्चयस्य देहं त्यजति मानवः
तन्तमाप्नोति देहान्ते भावं भावनया युतः
राघवस्मरणेनैव मृतिं प्राप्तो महीपतिः
तथापि गतवान्स्वर्गं काश्यपत्वाद्धरेः पिता
पुत्रशोकातुरां वध्वौ शेपुर्दशरथन्नृपम्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्वामप्याता दृशो भावः क्षिप्रमेव गमिष्यति ।
जीवितान्तकरो घोरो दातारमिव दक्षिणाः ।
तस्माद्द्रोहं न कुर्वीत ऋषिष्वजानतोऽपि वा ।
यदि दुःखान्प्रपद्यन्ते यथा दशरथो नृपः ।
समेत्य राजकर्तारः सभामीयुर्द्विजातयः ।
नाराजके जनपदे इत्यादि ग्रन्थविस्तरैः ।
श्रुत्वा महीपतीनां तु विनाशो नास्त्यकालतः ।
38 स्वप्नानां गतयाः प्रोक्ताः कालजा रोगजास्तथा ।
वातजाः पित्तजाश्चैव श्लेष्मजा मन्त्रजास्तथा ।
देवता वेशवशगा स्वप्नानां गतयो ह्यमूः ।
दुस्स्वप्नानामपि तथा भवन्ति प्रतिभावलात् ।
समुद्रशोषणं चापि नदीशोषणमेव च ।
पर्वतात्पतनञ्चापि आह्वानं कृष्णयोषिता ।
शकृन्मयह्रदे स्नानं शिरसो मुण्डनं तथा ।
वृक्षपर्वतभेदश्च मूर्ध्नि वज्रस्य पातनम् ।
एवमादीनि दुःखानि दृष्ट्वा सन्तप्तमानसैः ।
तद्दोषशमनार्थाय जप्तव्यं प्रयतात्मभिः ।
यामेव रात्रिं ते दूता प्रविशन्ति स्म तां पुरीम् ।
भरतेनापि तां रात्रिं स्वप्नो दृष्टो यमप्रियः ।
इदं सर्गं प्रयोक्तृणां दुस्स्वप्नशमनं भवेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शू

श्रुत्वा शून्य पुरारण्यानां भरतेन प्रभाषितम् ।

राज्ञा तु नगरं शून्यन्नकदाचित् भविष्यति ।

धि

ग्रहाणां न विनाशस्स्यात्सर्वथा ग्रहमेधिनाम् ।

भरतस्य च कैकेय्यास्संवादश्रवणान्नृणाम् ।

पातकानि च भिद्यन्ति तार्क्ष्यं दृष्ट्वा यथोरगाः ।

सोमात्यमध्ये संक्रुद्धो जननीमभ्यकुत्सयत् ।

ज्येष्ठो ह्यकृतदारे च ह्यकृताग्निपरिग्रहे ।

दाराग्नियोगं चक्रुस्ते येन रा मूढचेतनाः ।

3 a परिवेत्ता परित्याज्य इति शास्त्रेषु निन्दितः ।

तद्वज्ज्येष्ठे विद्यमाने कृतभूमिपरिग्रहः ।

परिराजकतां प्राप्य निन्दितस्स्याज्जगत्त्रये ।

तद्दोषशमनार्थाय जननीमभ्यकुत्सयत् ।

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।

उत्पथं प्रतिपन्नस्य परित्यागो विधीयते ।

इति शास्त्रं समालोच्य मातरं प्रत्यकुत्सयत् ।

कौसल्यायाश्च पुरतो भरतेन प्रभाषितम् ।

शपथप्रार्थनं सर्गं यस्यार्यानुमते गतः ।

इत्यादिश्रवणात्पुंसामभिशापो न विद्यते ।

अत्र ते कथयिष्यामि इतिहासं पुरातनम् ।

[illegible] नृपति [illegible] त्यक्त्वा राज्यं महत्तरम्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

राज्येऽभिषेच्य तनयं तपसे गतवान्वनम्
विरक्तस्य प्रवृद्धस्य स्वर्णरोमाख्य भूपतेः
निर्विशेषं परं ब्रह्म ध्यायतस्सततस्सुरैः
प्रेषिताः कति चिच्चोरा धना राज्ञो निवेशने
गृहीत्वा भूरिवहनो निर्गता राजवेश्मनः
पालकास्तस्य गा ज्ञाय अनुजग्मुर्मलिम्लुचान्
तस्करान्पालकाञ्ज्ञात्वा लुण्ठितन्धनसञ्चयम्
निधाय जग्मुर्वेगेन स्वर्णरोम्णस्समीपतः
मोषितो वित्तनिकरः स्वर्णरोम्णेति वादिनः
राज्ञो निकटमानिन्यू राजर्षिप्रवरं शुभम्
३१ ज्ञात्वा स्वर्णरोमाणं प्रणिपातपुरस्सरम्
प्रस्थापयन्महीपालस्तस्य माहात्म्यगौरवात्
स्वर्णस्तेयस्य विषये मिथ्याशापो यमागतः
इति बुध्वा स्वर्णरोमः प्रायश्चित्तमचिन्तयत्
अरुन्धतीपतिं गत्वा प्रायश्चित्तमपृच्छत
उपदिष्टो वसिष्ठेन शपथं भरतस्य सः
जजानतो न पूतात्मा प्राप्तवानथ मन्दिरम्
प्राग्द्वारे भूतदा कुब्जा सर्वाभरणभूषिता
लिप्ता चन्दनचारेण राजवस्त्राणि बिभ्रती
स्वजन्मनः फलं हेम स्वयं नामानिका सती

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निर्वापयामास शनैर्देवानां हितमिच्छति
तस्माद्व्रवण संस्कारै भूषणं युज्यते भृशम्
भरतस्य ससैन्यस्य भरद्वाजस्य सत्कृतिम्
पठन्दद्यात् पितृणां हि अक्षय्यफलसिद्धिदम्
जटिलं चीरवसनं प्राञ्जलिं पतितं भुवि
ददर्श रामो दुर्दर्शं युगान्ते भास्करं यथा
गायत्र्या स्वरसंख्यातं वर्णकं शृणु याचति
तस्य धर्मार्थमोक्षाणां फलं हस्तगतां भवेत्
कृत्स्नसर्गं प्रयोक्तॄणां सायं प्रातरहर्निशम्
तस्य सिध्यन्ति सकलाः युवराजं मुखा भृशम्
चित्रकूटे गिरिवरे भ्रातॄणान्तु समागमा
39 a शृण्वतां जपतां चापि तेषां सिद्ध्यन्ति सिद्धयः
देशान्तरगतानान्तु पुनरागमनं भवेत्
श्रुत्वा दशरथं वृत्तं मरौदो द्राघलो भृशम्
मातापित्रोर्विनाशे तु रोदनं शास्त्रचोदितम्
देशान्तर मृतिं श्रुत्वा पितृणां तनयस्तदा
तद्दिने वपनं कृत्वा निवापादीनि कारयेत्
अकुर्वन्यदि मूढात्मा देहो शुद्धो भविष्यति
तद्दिनो पक्रमं कुर्याद्दशाहं तिलवारि च
अञ्जलिस्तद्दिने वापि कुर्याद्दशदिनोदितम्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

राज्यमेकदिने कुर्यादकस्मिन्दिनेऽपि तर्पणम् ।
कर्कन्धुसहितं पिण्डमिङुदीफलनिर्मितम् ।
पितृणां तृप्तिदं प्राहुर्याज्ञवल्क्यादयो द्विजाः ।
एतत्ते राजशार्दूल निमज्जन्तोयमक्षयम् ।
पितृलोकं गतस्याद्य मद्दत्तमुपतिष्ठतु ।
पितॄणामुदकं दत्वा पुत्र एकादशेऽहनि ।
शृणुयाद्विप्रवाक्येन तां शूलित्यादि सर्गकम् ।
पितरस्तेन तृप्तास्स्यु रूर्ध्वगतिगामिनः ।
तमेवं दुःखितं वीक्ष्य विलपन्तं यशस्विनम् ।
रामः कृतात्मा भरतं समाश्वासयदात्मवान् ।
40 इत्यादि श्रवणं पुंसां वैराग्यं जायते भृशम् ।
एवमुक्त्वा तु विरते रामे वचनमर्थवत् ।
उवाच भरतश्चित्र वचनं धार्मिको यथा ।
इति सर्गं प्रयोक्तॄणां राघवे जायते भृशम् । भक्तिः । ।
श्रुत्वा रामस्य भणितं जाबालिमतभञ्जनम् ।
आसन्च्छास्त्ररतिस्तस्य नैव जायेत कर्हिचित् ।
क्रुद्धमाज्ञाय रामन्तु वसिष्ठः प्रत्युवाचह ।
आकाशप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ।
तस्मान्मरीचिस्संजज्ञे मरीचेः काश्यपस्सुतः ।
त्वन्मायया विश्वमिदमुद्भूतं सचराचरम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ज्येष्ठस्य पुत्रता प्रोक्ता कामजानितरान्विदुः
तस्मात्त्वदुक्तमर्यादा न भेत्तव्या यथापुरा
तथा कुरु महाबाहो गौरोहेणोद्धृता पुरा
राजधर्ममनुप्रेक्ष्य कुलधर्मानुसन्ततिम्
वक्तुमर्हसि काकुत्स्थ मम मातुश्च याचनम्
स्त्रीणां तु हृदयान्नित्यं वज्रं भवति राघव
कन्या तथा सम्यगुक्तमवधारय सुव्रत
शिष्यस्तु शरभङ्गस्य पादुकां कुशनिर्मिताम्
दत्वा राघवहस्ते तु गुरोर्निकटमभ्ययात्
तस्मिन्नवसरे रामः प्रतिज्ञां स्वञ्चकार ह
लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान्वा हिमं त्यजेत्
अतीयात्सागरो वेलां न प्रतिज्ञामहं पितुः
40 a एवं ब्रुवाणं भरतः कौसल्यासुतमब्रवीत्
तेजसा नित्यसंकाशं प्रतिपच्चन्द्रदर्शनम्
अधिरोहार्य पादाभ्यां हे पादुके हेमभूषिते
एते हि सर्वलोकस्य योगक्षेमं विधास्यत
अधिरुह्य नरव्याघ्रः पादुके ह्यवरुह्य च
प्रायच्छत्सुमहातेजा भरताय महात्मने
कौसल्याप्रार्थितस्तु वसिष्ठेन तु चोदितः
[illegible] रामो दात्कशपादके

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रघुनाथस्य मातुश्च भरतस्य च भाषितम्
शृण्वतां सर्वकार्याणि सिध्यन्त्येव न संशयः
रघुनाथ प्रसादेन रामसायुज्यमाप्नुयुः
पुत्रपौत्रप्रपौत्रैश्च क्षेत्रारामाणि भूरिशः
सिध्यन्त्येव प्रसादेन रघुनाथस्य शीघ्रतः
यथा कृतार्थो भरतो रघुनाथप्रसादतः
तद्वत्कृतार्थो भवति राघवेन्द्रप्रसादतः
अत्रेस्तु दर्शनं पश्चादनसूयाभिदर्शनम्
अनसूया प्रभावञ्च पातिव्रत्यस्तुति तथा
सीताकल्याणसंप्रश्नमङ्गरागस्य चार्पणम्
नि(वा)हात्पूर्वदिवसे भवान्या दर्शनात्परम्
श्रुत्वा कन्या सदा भर्त्रा रमते रुन्धती यथा
4। साकेतकाण्डस्य फलं वक्तुं वर्षायुतैरपि
न शक्यते मया देवि कञ्चित्कञ्चित्प्रदर्शितम्
अयोध्याकाण्डमखिलं ये शृण्वन्ति नरोत्तमाः
ते सर्वे हरिसायुज्यं प्राप्नुवन्ति न संशयः
भरतप्रतिमां कृत्वा चतुर्विंशत्सुवर्णकैः
कुम्भे निधाय तद्वर महतानु वेष्टयेत्
भरताय नमो मन्त्रमपूर्वं पूजयेन्नरः
काण्डान्ते तु सहस्रं स्यादिति वेदविदो विदुः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दद्याद्द्विजातये सर्वं सहस्र द्रव्यसंयुतम् ।
तदर्धैर्वा तदर्धैर्वा तदर्ध द्रव्यमात्रकैः ।
यथाशक्तिधनैर्वापि प्रतिमादानमाचरेत् ।
सहस्रारसहस्रांशु श्री प्रभया तुलित प्रभ ।
वाञ्छितं यच्च भरत प्रीतो भव दयानिधे ।
इति मन्त्रं समुच्चार्य प्रतिमामर्पयेन्नरः ।
काण्डान्ते तु सहस्रं स्याद्ब्राह्मणा(ना)न्तु भोजनम् ।
यथाशक्ति द्विजातीनां भोजनं समुपाचरेत् ।
प्रत्यहं ब्राह्मणान्पूज्य नमस्कारं प्रथमं यजेत् ।
ताम्बूलदानं विप्राणां श्रोतॄणां प्रीतिपूर्वकम् ।
अपूपैरिक्षुखण्डैश्च खर्जूरैः कदलीफलैः ।
प्रत्यहं राघवेन्द्राय मारुतेः पूजनन्तथा ।
41a कुर्वन्नभीष्टमखिलं प्राप्नुयाद्वि हहेर्बलात् ॥

इत्युमासंहितायामयोध्याकाण्डे
श्रवणफलवर्णनन्नाम
अष्टमोध्यायः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(2)

(॥ अथ नवमोऽध्यायः ॥)

प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान् ।
ददर्श रामो दुर्धर्षस्तापसाश्रममण्डलम् ।

महेश्वरः —

आरण्यकाण्डोदितमर्थजातं संक्षिप्य वक्ष्ये नगराजकन्यके ।
शृणुष्व तत्रोदितपुण्यराशिमितिहासं मम विक्रमाणाम् ।

प्रविश्यमानो विपिनं विराधन्नाम राक्षसम् ।
ददर्श रामो दुष्प्रेक्ष्यं कृतपुण्यफलोदकम् ।
सोऽपि तौ जानकीयुक्तौ दृष्ट्वा सञ्जातविभ्रमः ।
इयं परा महाशक्तिरियं सर्गस्य कारणम् ।
अस्यापि बोधनं मुक्तेः कारणं बन्धनेऽपि च ।
तस्मादिमां भजिष्यामि यावत्प्रारब्धनाशनम् ।
इति दर्शनमात्रेण विमुक्तो बोधपञ्जरम् ।
इत्थं भूत्वा महारैनां सीतां चैतन्यरूपिणीम् ।
रामस्तत्पापशान्त्यर्थं प्रायुङ्क्त निशितान्शरान् ।
न पीडाञ्चक्रुराहत्य क्रूरा राक्षसपक्षसि (व) ।

उमा —

रामकोदण्डनिर्मुक्ताः शिताग्राश्च शिलीमुखाः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बलात्तु वरदानस्य न प्राणान्घ्नन्ति सायका: ।

इति प्रश्ने तस्या प्रोक्तं कथमेतन्महेश्वर: ।

ईश्वर: —

शिवपूजाप्रभावेन वरदानवशादपि ।

महाबला महावीर्या राक्षसा: पिशिताशना: ।

42 तान्किञ्चिद्दर्शयिष्यामि शृणु शैलेन्द्रकन्यके ।

निरायो हाटकपुरे विधिवन्मामपूजयत् ।

सूर्यपुष्करणीतीरे स्थापयामास धूर्जटिम् ।

अतिकायश्शक्तिपुरे वल्मीकेशस्य दक्षिणे ।

~~दूषणोऽपि समासाद्य~~ पूजयामास विधिवत्प्रतिष्ठाप्य महेश्वरम् ।

दुन्दुभि: पूजयामास तस्य देवस्य वामके ।

सार्धयोजनमात्रे तु दुन्दुभेशाभिधं शिवम् ।

खर: खरपुरे लिङ्गं क्षीरनद्यास्तु दक्षिणे ।

दूषणोऽपि समासाद्य सह्यजायास्तु दक्षिणे ।

श्रीमद्रत्नगिरीशानमगस्त्येन सुपूजितम् ।

त्रिशिरा दक्षिणे तीरे सह्ययोन्या मनोहरे ।

सुपूज्य बलिनो जाता लोकोपद्रवकारका: ।

दक्षिणाशामुनिन्नित्यं मत्समाराधने स्थिता: ।

ब्रह्मर्षिन्तमुपासन्ते दुराधर्षास्सुरैरपि ।

उमा —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भवदाराधकास्सर्वे सात्विका ज्ञानपूजिताः ।
दुरात्मानः कथं जाता लोकोपद्रवकारकाः ।
महेश्वरः—
ममाराधनमाख्यातं त्रिविधं मुनिसत्तमैः ।
सात्विकं राजसं चापि तामसं चेति तत्त्रिधा ।
सात्विका ज्ञानवन्तश्च राजसा बलगर्विताः ।
तामसास्तु जना हीना लोकोपद्रवकारकाः ।
दक्षिणाशा मुनिर्नित्यं मत्समाराधने स्थिताः ।
42a ब्रह्मर्षिन्तमुपासन्ते इन्द्राद्या देवता गणाः ।
राजसेन समाराध्य जमदग्निकुलोद्भवः ।
अभूद्राजसयोगेन क्षत्रियाणां कुलान्तकः ।
केवलं तामसास्सर्वे विराधाद्या महाबलाः ।
बहिस्सत्वं मम सदा अन्तस्तामसमेव च ।
मां हि सत्वगुणोद्रिक्तमुपासन्ते हि सात्विकाः ।
तामसास्तामसेनैव (अजर) हवन्ते भुवि नित्यशः ।
महेश्वरः—
रामकोदण्डनिर्मुक्ता विफला मार्गणाः कथम् ।
इत्यर्थे संशयच्छेदं करोमि तव पार्वति ।
वध्येशानदयं नास्ति स्थापिते नास्ति पालनम् ।
रामे वार्तादयन्नास्ति नास्तीत्युक्तिररावपि ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

काण्डावलिर्विराधस्य निष्ठुरोरसि ताडितः ।
न व्यथाञ्चक्रुराहत्य अवध्य कवचावृते ।
कादम्बाश्च केवलाः लक्ष्ये पतन्ति न पतन्ति च ।
नामाङ्कितं लक्ष्यवेधं कुर्वन्त्येव न संशयः ।
नाम मन्त्रेण संयुक्ताश्शरा वर्हिण वाससः ।
हत्वा यान्ति पुनस्तूणीं प्रविशन्ति न संशयः ।
केवला नाम संयुक्ताः पक्षत्रियतागामिनः ।
यो विराधवधं नित्यं शृणोति श्रावयेत वा ।
तस्य पापानि सर्वाणि विलीनानि भवन्ति हि ।
(श्या)
न जातु महतां द्रोहं कुर्यात्तच्छेद्योगतिम् ।
3 मुनिभिर्नित्यमाख्याता तं मत्वा स्वर्गे स्वनाश्रितौ ।
विराधोऽपि गतो मुक्तिं का कथा ज्ञानपूरिते ।
भक्त्या केचिन्महात्मानः केचिज्ज्ञानेन योगिनः ।
अपरे सन्तत संपात सङ्गमादितरे जनाः ।
शरभङ्गाश्रमप्राप्तिं पुरुहूतसमागमम् ।
दर्शनं शरभङ्गस्य रघुनाथस्य पूजनम् ।
रामेण समनुज्ञातो लोकान्तरगतिन्तथा ।
शृण्वतां त्रिदशानां तु लोकप्राप्तिर्न संशयः ।
दण्डकारण्यनिलया ऋषयस्संश्रितव्रताः ।
राममासं भोजयिष्यन्त अक्रमेकानमादरात् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रीराम राम महाबाहो शृणु वृत्तान्तमादितः
पौलस्त्यो रावणो नाम दशग्रीवो महाबलः
तेनादिष्टा निशिचरा ऋषीणां प्राणहारिणः
सन्त्यत्र दण्डकारण्ये खर त्रिशिर दूषणौः
ताटकातनयेनापि सहिता राक्षसर्षभाः
भक्षणं भर्त्सनं चापि शिरसां लुवनं तथा
वेतानवृन्दशमनं बहिर्वेदिप्रदूषणम्
तादृशानां महाबाहो हननं कुरु राघव
रामो ऋषिगणैर्दत्तं ~~पूर्ण~~ पूर्णकुम्भोदकं शुचि
जटाचूडाङ्किते मौलौ प्रोक्ष्य सीतां च लक्ष्मणम्
रामः प्रतिज्ञामकरोत् ऋषीणामग्नितेजसाम्
43a रक्षसां निधनं जन्ये ऋषीणामभयन्ददौ
प्रपन्नानान्तु भूतानां रामश्शरणदस्सदा
ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम्
शरणं प्रददौ राम इत्युक्ता का विचित्रता
प्रपत्तिर्द्विविधा प्रोक्ता जार्जरी चैव वानरी
तवाहमित्युपगतास्तन्नाम कृतलाञ्छनाः
तदर्चापूजनरतास्तदृष्टान्नेन भुञ्जतः
गर्भभूता वयमिति प्रोचुस्तत्र महर्षयः
तस्माद्दास्यं गतास्सर्वे ऋषयो ब्रह्मवादिनः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(सी)
सुताऽथ रघुनाथस्य हितकामा तपस्विनी ।
शस्त्रत्यागनिमित्ताय कथा मुक्तवती किल ।
अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् ।
न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ।
एतच्छ्रवणमात्रेण रामात् कांक्षितमाप्नुयात् ।
क्वचिन्मासं क्वचित्पक्षं क्वचिन्मासचतुष्टयम् ।
षाण्मासं वत्सरंचापि वत्सरत्रितयं तथा ।
उषित्वा दर्शनं कर्तुं दक्षिणां मुनिं ययौ ।
गत्वागस्त्याश्रमं प्राह शिष्यं प्राज्ञो महाजसम् ।
एते वयं वनमत्युग्रं प्रविष्टाः पितृशासनात् ।
द्रष्टुमिच्छामहे सर्वे भगवन्तं निवेद्यताम् ।
यङ्कारोऽयं निगदितं देव्या अष्टमवर्णकम् ।
44 यंकारो वायुदैवत्यो वायुर्ब्रह्मेति गीयते ।
हृदि ध्यायन्महादेवमास्ते हि तपसां निधिः ।
ध्यायन्तं शङ्करं सर्वे ब्रह्माद्या देवतागणाः ।
भजन्ते शङ्करं द्रष्टुं कांक्षया भक्तपूजनम् ।
कैलासे भक्तहृदये पार्वत्याः केलिमण्डपे ।
नित्यमास्ते शिवो यस्मात्तस्मात्तत्तं समाश्रयेत् ।
अगस्त्येनाभ्यनुज्ञातो मध्ये पञ्चवटीं प्रति ।
गच्छन्ददर्श राजानं गृध्राणां चिरजीविनम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बहुपान्मूलनिलयं रामः पप्रच्छ को भवान् ।
गृध्रोऽहं वैनतेयस्य द्वितीयस्य सुतो बली ।
जटायुं विद्धि राजेन्द्र रक्षिष्ये जानकीमहम् ।
सर्गाणां कथनाद्देवी वंशसर्गविलोपनः ।
न जायते कदाचिच्च. कुलन् छिद्रैर्भविष्यति ।
रामः पञ्चवटीं गत्वा शारदां त्रितयां सुखम् ।
उवास दैवतैरीड्यो गोदावर्यास्तटे शुभे ।
स्नात्वा कदाचिद्ध्ये (द्धे) मन्ते लक्ष्मणेन च सीतया ।
कथां चिरन्तनां तत्र श्रावयन्नुटजांकणे ।
स्थितवान्जानकीवक्त्रे स्वबिम्बमवलोकयन् ।
तन्देशं राक्षसी काचिद्धाजगाम यदृच्छया ।
सीता कुटजमध्यस्थां रामं वीक्ष्य च सुन्दरम् ।
सा मन्मथशरैर्विद्धा वृद्धा फलितमूर्धजा ।
(ना)
44a सुकुमारं विरूपा सा सुस्वरं भैरवस्वनम् ।
तरुणन्दारुणा वृद्धा अकामयत भोगिता ।
सा रामाभ्यर्णमभ्येत्य प्राहेयन्त्यज्यतामिति ।
स्वरूपं बिम्बितं वीक्ष्य जानक्या मुखदर्पणे ।
इमां विरूपामसतीं कराकान्तिर्न तादृशीम् ।
सीतां विहाय मान्नित्यं राम कान्तरभूमिषु ।
कृतदारोऽस्मि सुभगे यवीयान्लक्ष्मणाभिधः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्य त्वं गेहिनी भूत्वा भुङ्क्ष्व भोगान्यथेच्छया ।
लक्ष्मणेनापि साक्षिप्ता: कथं दासं श्रयिष्यसि ।
दासित्वञ्च दृशीनान्तु निन्दितं सुभ्रु गम्यताम् ।
इति डोलायिता चण्डी शीघ्रं दुर्जनकात्मजाम् ।
उटजद्वारनिकटे रामेण प्रतिबोधिता ।
लक्ष्मणस्तूर्णमुत्थाय करवालेन वीर्यवान् ।
कर्णौ स्तनौ नासिकां च्चाच्छिनत् रामशासनात् ।
कर्णनासापहरणं शृण्वतां पठतां सदा ।
न जातु मानभङ्गस्स्यात् रघुनाथप्रसादतः ।

खरं जनस्थानगतं खरस्वना
खरादिरक्षः कुलनाशकारिणी ।
खरांशुमेलेस्तनयस्य रक्षसा-
मसौ प्रहाराय कृते वद्रतिका ।
खरः खरान्खद्गजनारिवर्गान्
व्यग्रः प्रयाणाय समादिदेश ।
रामोपि तान्कन्सुवर्णपुंखैः
व्यस्तं श्चकाराप्रतिमप्रभावः ।
चतुर्दशसहस्राणां सङ्ग्रामे त्वनिवर्तिनाम् ।
रक्षसां हिमकर्माणां प्रधानानां कनीयसाम् ।
45 एकैकस्य सहस्राणां सन्त्येन पिशिताशनाः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तान्मोक्षयित्वा तु खरः पललाशनसंहतिम् ।
समराय समाश्रित्य राघवाभ्याशमभ्ययात् ।
रामोऽपि जानकीं न्यस्य दर्यां भ्रातृसमन्विताम् ।
सन्नद्धः कवची खड्गी युद्धाय समुपस्थितः ।
खरेण प्रहिताश्शूराः संग्रामे बलिवर्तिनः ।
राममावृत्य बाणौघैः ववृषुर्मुक्तिगामिनः ।
सानुबन्धा निशाचरा बाणैर्दारितकिल्बिषाः ।
राममासाद्य समरे सायुज्यपदवीं गताः ।
खरस्य समरे रामं ददृशुस्सिद्धचारणाः ।
तं सर्वे तेजसाविष्टं प्राद्रवन् वनदेवताः ।
उद्दशन्तया निर्भासितं दृष्ट्वा रामकलेबरम् ।
शार्ङ्गं चक्रं च शूलं च पिनाकं खेटमेव च ।
खड्गं घण्टां च डमरुं बाणं पाशाङ्कुशं तथा ।
टङ्कं वज्रं च खट्वाङ्गं परशुं त्राणकारणम् ।
जटां त्रिणेत्रं बिभ्राणां ददृशुस्सिद्धचारणाः ।
रणे रामेण बाणौघैः छिन्नाभिन्ना निदारिताः ।
प्रभग्नं तद्बलं सर्वं रामेणाद्भुतकर्मणा ।
45 a दृष्ट्वा निषूदितं सर्वं सैन्यं राक्षसपुङ्गवः ।
त्यक्त्वा कथं महावेगात् राघवं शीघ्रमाययौ ।
अपासर्पत्प्रतिपदं किञ्चित्त्वरितविक्रमः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्थूलदेहावसिष्टस्य नास्ति कैवल्यमण्वपि ।
तस्मात्प्रारब्धनाशाय विमोक्ष्यन्तकरं शरम् ।
गृहीत्वा वैष्णवं चापं कठोरांशोन्वयोद्भवः ।
खरं प्रति महावेगात्ससर्ज निशितान्शरान् ।
तानचिन्त्य महावेगान् क्रम पुंखान्छिलाशितान् ।
सकाशं रघुनाथस्य वेगेन प्रत्यपद्यत ।
रामश्शरेणाशु जहार मौलिं
किरीटजुष्टं मणिकुण्डलाढ्यम् ।
कलेबरा भूमितले तपापात्तस्वंज्योतिषा
द्योतितमाशु कुर्वन् ॥
उत्पतेजस्तबको विशाल.
मुरस्थलं प्राप रघूत्तमस्य ।
स्मृत्वा रघूत्तमं मर्त्यस्त्यजत्यन्ते कलेबरम् ।
रामसायुज्यमाप्नोति दृष्टेऽर्थे किं विचित्रता ।
ववर्षुर्देवगन्धर्वास्सिद्धविद्याधरर्षयः ।
प्रसूननिकरैर्वर्षं राघवं खरघातिनम् ।
राज्याभिषेकसमये श्रोतव्यं विप्रवाक्यतः ।
स्थिरं राज्यमथासाद्य सुरेन्द्रो यथा दिवम् ।
श्रुत्वा श्रीरामविजयं पापबन्धाद्विमुच्यते ।
46 तथैव शृंखलाबद्धान्धाद्रणबन्धात्तथैव च ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रुत्वा पुष्पवती नारी तनयं वंशवर्धनम् ।
लभते राघवेन्द्रस्य प्रसादात्कीर्तिवर्धनम् ।
पुरा निशां पतिः कश्चित् मणिगुप्त इति श्रुतः ।
श्रुताध्ययन संपन्नो वित्तो वित्तपतेस्समः ।
निजाश्रमोचितान्धर्मान् त्यक्त्वार्थिको बभूवह ।
निष्ठुरो निर्घृणो मूर्खो निरातङ्को वणिक्पतिः ।
भिक्षुकाणां तथा समागन्दरिद्राणां वराटकम् ।
न ददाति घृणाशून्यो रत्नगुप्ताभिधो वणिक् ।
एकदा ग्राममभ्येत्य भिक्षुरन्नमयाचत ।
तन्ताडयत वेगेन दण्डेन स वणिक्पतिः ।
स्मित्वा भिक्षुरथप्राह खिन्नस्ते पाणिलाघवः ।
वराटकं प्रगृह्य त्वं यन्ता किं यममन्दिरम् ।
इत्युक्त्वा तस्य भवनान्निश्चक्राम दयानिधिः ।
जन्मान्तरार्जितैः पुण्यैः चित्तशुद्धिमुपागतः ।
वृथा मांसानि जग्धानि कृसराणि पयोदनम् ।
शष्कुलीपिण्डिकाश्चापि तिलोदनमतः परम् ।
सैपोदनं पायसं च वृद्धा जग्ध्यान्यभुङ्गणशः ।
प्रत्यब्दं पितृतृप्तिं च न कृता द्रव्य नाञ्छया ।
तद्दोषशमनार्थाय प्रायश्चित्तं विधीयताम् ।
इति विज्ञापितं श्रुत्वा वैश्यस्य द्विजपुङ्गवाः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

16a आलोढ्य सर्वशास्त्राणि चक्रुः पापविमोचनम्
पूर्णकुंभः प्रतिष्ठाप्य क्षौमवस्त्रेण वेष्टितम्
श्रीरामप्रतिमां कृत्वा समाराध्य यथाविधि
तन्देशं राक्षसी काचिदाजगाम यदृच्छया
इत्युपक्रम्य सर्वाणि जेपुर्द्वादशपुङ्गवाः
तन्दृष्ट्वा शत्रुहन्तारम्महर्षीणां सुखावहम्
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे
इत्यन्तैर्मन्त्रनिकरैर्जेपा द्वादशभूसुराः
सिषिचु कुंभतोयेन मुक्तोभूत्पातकोद्यतः
अकंपनोदितं श्रुत्वा रावणो राक्षसाधिपः
मारीचाश्रममासाद्य वसन्तन्ताटकासुतम्
सहायं वरयामास मारीचन्नाम राक्षसम्
वार्यमाणस्तु बहुशो मारीचेन स रावणः
निवृत्य लङ्कां वेगेन तूर्णं प्रत्यपद्यत
लङ्कां शूर्पणखी गत्वा रावणं प्राह राक्षसी
नन्च देवी न गन्धर्वी नासुरी नच राक्षसी
दृष्टपूर्वा मया नारी त्वदर्थे हर्तुका मया
तदाश्चर्यगता तेन विना सा कारिता बलात्
तस्य भार्यां हर क्षिप्रं तस्मा.. क्षयति जीवितम्
युद्धेन नावकाशोऽस्ति जेतुं रावण कर्हिचित्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

47 श्रुत्वा दशग्रीव गुणानुवर्णनं

सर्गो विशिष्टो भविता परित्याम्

श्रीपार्वतीशस्य पदानुसेविनीं

न कश्यमस्त्यण्ड विकृतस्व लोके

पुनर्मारीच माश्राय वरयामास रावणः

साहाय्यं बहुधा सोऽपि वारयामास रावणम्

मारीचोक्त मुपश्रुत्य गुरुमान्भवति क्षितौ

जानकीं मोहयामास मारीचो श्वापदो मृगः

श्रुत्वा माया विकारेण सीतां मायास्वरूपिणीम्

माया सर्वान्ध्रो भयति विना राघवसेविनम्

रामोऽपि भार्यावाक्येन दूरं वनमधावत

रामेषुणा हतस्सोऽपि विस्स्वनं कोशनं व्यधात्

मां रक्षकामो विपिनं भरतेन स्वयन्कृवा

प्रेषितस्तव कामानां नास्ति सिद्धिः कदाचन

उपधाय करन्तस्य कथमन्यस्य संश्रये

न सिध्यति मरिष्यामि तवटच्छनचेदिह

सीता कठोर वाक्येन स ताडितो राघवानुजः

विसृज्य सीतां वेगेत्य पार्श्वं रामस्य जग्मिवान्

तदन्तरे खरे युक्तो रावणो नाहृतो रथः

सीतानिकटमभ्येत्य दर्शनं समपद्यत

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तं विसृज्य शिखी छत्री त्रिदण्डी भिक्षुवेषधृक् ।
सीतानिकटमासाद्य तस्थौ ब्रह्म उदीरयन् ।
आगतं यतिनं वीक्ष्य (क्ष्या) नर्च्चायतल्लोचना ।
यतीनां पूजनं कार्यं स्त्रिया वा पुरुषेण वा ।
47a यस्य गेहे यतिर्भुङ्क्ते तस्य भुङ्क्ते हरिस्स्वयम् ।
यस्य गेहे हरिर्भुङ्क्ते तस्य भुङ्क्ते जगत्त्रयम् ।
सीतारावणसंवादं ये शृण्वन्ति नरोत्तमाः ।
न जातु तेषां पापेभ्यः पीडा तस्य भविष्यति ।
दशग्रीवं प्रति प्राह तदा सीता यशस्विनी ।
मम भर्ता महातेजा वयसा पञ्चविंशकः ।
अष्टादश च वर्षाणि गण्यन्ते मम जन्मनि ।
भक्तार्णमुनिः प्राह नवमं मुनिसिद्धम् ।
यदन्तरं सिंहसृगालयोर्वने
यदन्तरं स्यन्दिनिकासमुद्रयोः ।
यदन्तरं काञ्चनसीसलोहयोः
यदन्तरं मद्गुमयूरयोर्वने ।
यदन्तरं हस्ति बि(डा)लकयोर्वने
तदन्तरं दाशरथेस्तवैव च ।
इत्यादिवाक्यनिकरं शृण्वतां भूतनाशनम् ।
रघुनाथसमा लोके सति किम्मनुजेष्वशुभम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वरूपं रावणं प्राप्य गृहीतुं जनकात्मजाम् ।
प्राप्तवान्निकटं तूर्णं गृहः खे रोहिणीमिव ।
वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः ।
ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना ।
तं दृष्ट्वा गिरिशृङ्गाभं तीक्ष्णदंष्ट्रं महाभुजम् ।
प्राद्रवन्मृत्युसंकाशं भयार्ता वनदेवताः ।
छाया ग्राहित्वमस्यास्ति सर्वविद्याविशारदे ।
48 केशच्छायां परामृश्य जानुच्छायां तथैव च ।
गृहीत्वा जानकीं हृष्टो लङ्कां प्रायात्स रावणः ।
सीतापहारश्रवणं ये कुर्वन्ति नरोत्तमाः ।
न तेषां विमुखा देवी भविष्यति कदाचन ।
अज्ञानं विलयं याति राघवस्य प्रसादतः ।
क्रोशन्तीं रामरामेति वीक्ष्य न्यग्रोधमाश्रितः ।
रावणं योधयामास सीतामोक्षणकारणात् ।
छत्रं बाहुं तस्य मौलिं चापं साङ्ग्रामिकं रथम् ।
खरान्केशान्नखैस्तुण्डै रक्षसो द्रामहेतवे ।
श्रुत्वा खगेश्वरस्यापि रक्षसामीश्वरस्य च ।
आयोधनं रणान्मुक्तो भृत्यस्वामिकृतान्निजात् ।
रावणो खण्डयत्पक्षौ चन्द्रहासेन वीर्यवान् ।
सीतां गृहीत्वा च पुनर्दक्षिणाशां ययौ बलात् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रावणाङ्कगता सीता शुशुभे मदिरेक्षणा
कालिका मध्यगा दीपा यथा व्योम्नि प्रकाशते
तस्याः कौशेयमुद्धूतमाकाशे हाटकप्रभम्
पातितं वायुना पार्श्वात् कुचमण्डलमण्डनम्
तस्मिन्नाभरणं बद्ध्वा चेलखण्डे महीसुता
गिरिप्रवरमध्यस्थान् पञ्चवानरसत्तमान्
उद्दिश्य पातयामास रावणो नैव बुद्धवान्
निरस्तं भूसुतायास्तु क्वचिद्दामिक संहति
गलितं भूसुतायास्तु क्वचित्कञ्चुकबन्धनम्
अबलेन सुतन्देव्या क्वचित्ताम्बूलचर्वितम्
क्वचित्स्त्रियः क्वचित्पुंसः तत्तद्वस्तु विलेपनम्
48 a चक्रुर्देव्या कृतं यस्मात्तस्मात्सर्वे प्रिये इमे
सीतापहारमारभ्य लङ्कायां स्थापनावधि
श्रवणाच्छास्त्रविहितात्क्लेशा देवी विमुच्यति
सीतारावणसंवादं राक्षसीनाञ्च तर्जनम्
सीता प्रत्युक्तिकथनं ये शृण्वन्ति नरोत्तमाः
निर्धूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्
अशोकवनिकामध्ये पूजिता जनकात्मजा
आस्ते मघवता दत्त पायसान्नेन जीविका
रामो मायामृगं हत्वा न्यवर्तत महापथि

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शकुनं वायसं चापि लक्ष्मणस्य च दर्शनम् ।
सीता दुरुक्ति कथनं लक्ष्मणस्य मुखाच्छ्रुतम् ।
श्रुत्वा न जातु पीडा स्यादभिशापकृतं महत् ।
अत्र ते कथयिष्यामि इतिहासं नृपात्मजे ।
पुरा पूरूरवाभिख्यो राजा धर्मपरायणः ।
तपस्तप्त्वा मखैरिष्ट्वा कृत्वा दानान्यशेषशः ।
उर्वशीं लोकविख्यातां स्वकामेन भूभुजा ।
प्रसादो भविता नित्यमुर्वश्या मे सलोकता ।
विहारो भविता नित्यमिति कामार्पणं व्यधात् ।
लब्ध्वाप्याप्सरसां मुख्यमरमद्बहुवत्सरम् ।
इन्द्रेण चोदिता वेश्या तस्योत्कर्षासहिष्णुना ।
चरणेनाहनन्मौलौ पुरूरवसमुर्वशी ।
न जातु स्त्रैणसख्यानि सन्ति सालावृका स्मृताः ।
राजानमपि कामार्ता पदा शीघ्रमताडयत् ।
पपात भूतले स्वर्गादुर्वशीचरणाहतः ।
भूमौ स्थित्वा परामृश्य ज्ञात्वा दिव्येन चक्षुषा ।
49 अशपत्क्रोधताम्राक्षः स्ववेण्यां मदगर्विताम् ।
हे जाये मनसा तिष्ठ इति प्रोक्तं मया पुरा ।
त्वया निमृश्य मद्वाक्यं हठादिन्द्रेण चोदिता ।
पादेन ताडितो यस्मात् भगे रोगः प्रजायताम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ये वेशीमुपयान्त्यज्ञा वेदनिष्ठैर्बहिष्कृताः ।
भवेयुः कर्मनिर्मुक्ता ग्रन्थिलश्शूलरोगिणः ।
अपित्वा मातरं गच्छेन्न गच्छेद्दैव दारिकाम् ।
मातृकन्यां स्वलिङ्गस्य छेदनम्मुनिभिस्स्मृतम् ।
रूपाजीवासुता सत्ये निष्कृतिर्मुनिभिः स्मृता ।
इति शप्ते तान्देवान्शरजालेन रावणः ।
निपेतुर्देवगन्धर्वा दानवाश्चारणैस्सह ।
राममानन्तदा दृष्ट्वा त्यक्त्वा तूष्णीन्त्यवीविशन् ।
वसिष्ठो नृपशापेन त्यक्त्वा देहमचेतनम् ।
सत्यलोकेश्वरं नत्वा पुनर्देहमयाचत ।
वसिष्ठेन समाज्ञप्तः क्षेत्रशुद्धिमथाकरोत् ।
ब्रह्मा द्विजपदां शुद्ध्यै शापशुद्धिमतन्वत ।
पुनरेवोदितश्शापो ह्यप्सरस्सु न दुष्यति ।
मानुषीषु भवेद्दोषो रूपाजीवासु कामिषु ।
पर्णशालामथागत्य ~~सम~~ शून्यां प्रेक्ष्याथ राघवः ।
चक्रोश सीतामुद्दिश्य पक्वतालफलस्तनीम् ।
बिम्बोष्ठीं कदलीकाण्डजङ्घां बिल्वोपमस्तनीम् ।
कामातुराणां काम्येषु प्रीतिरित्थं भविष्यति ।
इत्थं ब्रह्मणि चेद्भक्तिस्तस्य मुक्तिर्भविष्यति ।
इति सीतार्थकं रामो रुरोदोद्दिश्य गेहिनीम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सीतामन्वेक्षमाणौ तौ ददृशाते रणक्षितौ ।
क्षतजार्द्रम्महाकायम्मुमूर्षुं पक्षिपार्थिवम् ।
दयाञ्चकार श्रीरामो भार्यारक्षणतोषितः ।
बाणमोक्षेण पापानां गृध्रं दग्धुमथैच्छत ।
49 a दर्शनाज्ज्ञातमाज्ञाय तस्मिन्देशीति शासनात् ।
गृध्रराजः———

हेराम भवताज्ञप्तो रक्षिता जनकात्मजा ।
दशग्रीवो जहारैनां वैदेहि लग्ने निमूढधीः ।
हत्वा पक्षौ मामको स चन्द्रहासेन वीर्यवान् ।
केशधायां परामृश्य जानुधायां तथैव च ।
दक्षिणा दिशमाक्रम्य लंकायां गतवान्प्रभो ।
देवीमामाह राजेन्द्र यावत्संभाषणम्मम ।
भवता तावदास्तां मे प्राणा इत्याह जानकी ।
इत्युक्त्वा स जहौ प्राणान्राघवेन्द्रस्य सन्निधौ ।
कङ्कान्चले समाराध्य महेशं लब्धवान्वरम् ।
तस्मात्स्वरूपं गतवान्रघुनाथस्य पक्षिराट् ।
जटायोस्संस्कृतिं कृत्वा स्वर्लोकं याति मानवः ।
कृमिस्संचितपापानां प्रारब्धानां भविष्यति ।
दाहोद्युक्तं रघुवरं प्राह वागशरीरिणी ।
श्मशानरहिते राम कुरु संस्कारमस्य तु ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इत्युक्तो दिव्यया वाण्या रामस्सौमित्रिणा सह
हृष्टमुद्योगमास्थाय जटायोरस्य महीतले
तत्र चाप्यशरीरस्थौ वाणी प्रोवाच राघवम्
अत्र पूर्वं शतन्दग्धं जटायूनां त्वया पुरा
इत्युक्तं क्रमात्तत्सर्वं विलोक्य पितृकाननम्
वामोरौ दाहमकरोज्जटायोर्मुक्तिहेतवे
लक्ष्मीस्तद्रागमुत्सृज्य गता वक्षस्थलं हरेः
दक्षिणं कौस्तुभाक्रान्तं राघवेन्द्रस्य सर्वदा
विना श्राद्धं समाकर्ण्य पितरस्तु स्विगामिनः
यज्जातयो मृतिं यायान्तज्जातीयांश्च पूजयेत्
50 ब्राह्मणः प्रथमं पूज्यजातीयास्तदनन्तरम्
रामो नारायणो देवस्सीता लक्ष्मीति कीर्तिता
रावणेन परामृष्टा केशाद्वेदवती विभो
सीता वेदवती देव दशग्रीवेण रक्षसा
श्रितवैकुण्ठभवना पूर्णांशेनावतीर्णवान्
लक्ष्मीः कुत्रास्थिता देव हरिं नित्याश्रिता स्वयम्
सीतालक्ष्म्योर्भिदा वास्तु अभेदो वा वदस्व मे
भेदे कुत्र स्थिता लक्ष्मीरभेदे दूषणं शृणु
केन भूलोकगमनं भवात्रितयसंभवः
कस्मात् लङ्कानिवासश्च राक्षसीनाञ्च तर्जनम्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हरणं रावणेनापि केन विष्णोः प्रिया भवेत् |

महेश्वरः ——

भेदाभेदोऽस्ति सीताया रमायाः कारणान्तरात् |
50a पुरा विहारसमये लक्ष्मी कौस्तुभमध्यगा |
स्वच्छायां वीक्ष्य सापत्न्यशङ्कया कुपिता भवत् |
तां हरिस्सान्त्वयामास कुपितामितरां भृशम् |
अन्यां निर्भर्त्स्य दौरात्म्यात्समामतिक्रम्य वक्षसि |
सत्यन्त्वत्सदृशीमन्यां लोकानुग्रहकाम्यया |
सा नित्यं शत्रुभिर्हृता भवेज्जन्मनि जन्मनि |
तत्सर्वं लोकरक्षार्थं नित्यं भवतु सुन्दरि |
सा हि वेदवती जाता सञ्जाता जनकात्मजा |
इन्दिरा रघुनाथस्य नित्यमास्ते सुवक्षसि |
रामज्जटायुसंस्कारात्त्यक्त्वा दक्षिणतस्स्थिता |
रामो गोदावरीतीरे विचिन्वञ्जनकात्मजाम् |
लक्ष्मणेन युतो धन्वी सूरिः प्रत्यपद्यत |
तत्र लिङ्गं प्रतिष्ठाप्य पूजयामास धूर्जटिम् |
रामेश्वरमिति ख्यातं सर्वाघौघविनाशनम् |
यद्दृष्ट्वा मनुजास्सर्वे ब्रह्मज्ञानं भजन्ति ते |
नीवारान्नैः प्रशस्तैस्तु प्रशस्तैस्तुलसीदलैः |
नीलोत्पलप्रसूनैश्च पूजयामास शङ्करम् |

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

51 आराधितो महादेवः प्रसादमकरोत्प्रभुः ।
शृणु राघव राजेन्द्र येन प्राप्स्यसि जानकीम् ।
इतो दक्षिणभागे तु षष्टियोजनमात्रके ।
विरूपाक्षस्य सन्निधे तुङ्गभद्रा सरित्तटे ।
किष्किन्धेति पुरी रम्या नानाप्लवगसङ्कुला ।
तत्र वानरराजानौ वालिसुग्रीवनामकौ ।
तत्रैको हरिराज्यार्थी मोक्षार्थी चापरो हरिः ।
तयोस्तेषां राज्यमोक्षौ वदस्व मम शासनात् ।
समुद्रमध्ये सेतुञ्च कुरु मच्छासनाद्भवान् ।
रावणं शिवपूजाढ्यं सर्ववेदोपबृंहितम् ।
ब्रह्माणं सर्वशास्त्राणां संहर्ता रणभूतले ।
हत्वा, सीतां समासाद्य स्वपुरं यास्यसि ध्रुवम् ।
इत्थं रामेश्वरस्याज्ञां प्राप्य रामो महीपतिः ।
क्रौञ्चारण्यं समासाद्य जगाम विपिनान्तरम् ।
क्रोशमात्रे ददर्शाग्रे राक्षसीं विकटाननाम् ।
51a तस्यास्तनौ च कर्णौ च नासिकां चैव लक्ष्मणः ।
अलावीत्स च दृष्ट्वा तेन सा द्रुद्राव तिवेगिता ।
कबन्धरामसंवादं ये शृण्वन्त्यादरान्नराः ।
विप्रावमानजनितं नाशं क्षिप्रं गमिष्यति ।
अत्रेतिहासमाकर्ण्य अवधारय चेतसि ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुरा भोजकटे राजा कुन्तिभोज इति स्मृतः ।
पृथिवीं पालयामास धर्मेण स्वमिव श्रयः ।
तस्याभ्यर्णं समासाद्य विप्रो दूर्वासो वदत् ।
इमां कन्यां प्रतीक्षस्व यावदागमनं मम ।
कृत्स्नं भूमण्डलं दृष्ट्वा क्षिप्रमेष्यामि भूपते ।
इति राज्ञे समादिश्य गतो दूर्वासो महामुनिः ।
द्वित्रिसंवत्सरातीते शुनश्शेपाभिधो द्विजः ।
अयाचत महीपालं भार्येयं दीयतां मम ।
इदं श्रुत्वावनीपालस्त्विन्तानिष्ठो वदद्विजम् ।
न्यासभूता द्विजेनेयं कन्या यावत्समागमः ।
पश्चाद्दुद्धश्छीघ्र हे विप्र उदङ्गागमने स्तति ।
इत्युक्तः कुपितः प्राह शुनश्शेपो ऽवनीपतिम् ।
अविचार्यैव शास्त्रं मामज्ञानान्मूढ जल्पसि ।
कन्या भर्तृवशे देया कन्याया श्रुतिमिच्छता ।
गृहीते कुलहानिस्स्यात् मानहानिर्भविष्यति ।
ऋतुस्नातां सतीं भार्यां न व्रजेद्यदि मानवः ।
ब्रह्महत्यामवाप्नोति यावदातिंगयसंख्यया ।
अत्रेतिहासं वक्ष्यामि पुरावृत्तं नराधिप ।
पुरा कलवरः कश्चिद्वृक्षशाखाग्रसंस्थितः ।
मदनेन परीताङ्गो भार्यां रन्तुमथाह्वयत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वृद्धाग्रे संस्थितो नाथागोयं किं शास्त्रेनाशिरसा ।
पतेशं पतिता भूमावद्यास्ते ब्राह्मणब्रुवः ।
तस्य गात्रेण संपर्कः पतनायैव केवलम् ।
साध्वीं भार्यां विहायासौ तपस्तप्तुं कृतत्वरः ।
52 तपोवनमुपागम्य ऋतूनां षट् समत्यगात् ।
ब्रह्महत्यां गतो विप्रो ऋतुसंख्या यथा भवेत् ।
तद्वदेवं मम द्रोहो दीयतां गेहिनी मम ।
इदं वाक्यं समाकर्ण्य ब्राह्मणाय प्रियां नृपः ।
न दत्तवान्याच्यमानो गेहिनीं प्रणयीमपि ।
क्रोधाद्वरापतिं प्राह शुनश्शेपाभिधो द्विजः ।
पिशाचो भव राजेन्द्र भार्याद्रोहः कृतो यतः ।
कन्यां यच्छति वृद्धाय नीचाय धनलिप्सया ।
कुशीलाय कुरूपाय सप्रेतो जायते नरः ।
कन्या यूनि प्रदातव्या सुनत्याः प्रीतिमिच्छता ।
तस्माद्भर्तृवशे देया पितृगेहे न वासयेत् ।
स्थितायां मानहानिस्स्यात् हवति क्रमणं तथा ।
नित्यादीनां च लोपश्च भविष्यति न संशयः ।
इत्युक्तमात्रे राजापि पिशाचत्वमुपेयिवान् ।
मन्त्रिणो ब्राह्मणं नत्वा प्रार्थयाञ्चक्रुरञ्जसा ।
शुनश्शेपो व्याजहार कृपालुश्शापशान्तये ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रुत्वा राघवसंवादं कबन्धेन कृतं महत् ।
पिशाचत्वाद्विमुच्येत राज्यञ्चापि स गच्छति ।
इत्यनुग्राह्य तां भार्यां गृहीत्वा स्वतपोवनम् ।
शुनश्शेपे गते राजा पिशाचत्वं समास्थितः ।
गृहीत्वा क्षत्रियसुतं पीडयामास वेगतः ।
नित्यं शृणोति भक्त्यन्ते श्रीमद्रामायणं पिता ।
सोऽपि श्रुत्वा सहैवास्ते श्रीमद्रामायणं दिनम् ।
आरण्यकाण्डसमये श्रुत्वा दानवचेष्टितम् ।
विमुक्तशापबन्धस्य कुन्तिभोजोऽभवन्नृपः ।
शबर्यास्सत्कृतिं श्रुत्वा साध्वीनां लोकभाक् भवेत् ।
52a शबरी रघुनाथस्य पादपद्ममवन्दत ।
भक्तो हरिप्रियं दृष्ट्वा प्रपत्तिं सम्यगाचरेत् ।
पाद्यमङ्गुलिविच्छेदमुरोविन्यस्तमक्षरम् ।
तन्नामकरणञ्चापि दास्यमेतच्चतुर्विधम् ।
सद्भक्तवन्दनञ्चापि भक्तानाञ्च प्रपूजनम् ।
दर्शनं स्मरणञ्चापि हरिप्रीतिकरं भवेत् ।
न कुर्याज्जातिनियमं न वयःप्रेक्षणं तथा ।
कुर्यान्नमस्कृतिं सोऽपि नमस्कुर्याद्धरेरिति ।
भक्तानां मेलनं यत्र यत्र बिल्ववनं तथा ।
तुलसीकाननञ्चापि पुष्पपद्मवनं तथा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नित्यमास्ते हरिस्तत्र रमया शङ्खचक्रभृत् ।
पंपातीररुहान्वृक्षान् फुल्लपुष्पैरलंकृतान् ।
कासारान्कुल्लकमलान्नीलोत्पलसमाकुलान् ।
विद्याधरानुचरितान्किन्नरीभिस्तथैव च ।
गजसिंहसमाकीर्णमुदीर्णशरभायुतम् ।
उपेतमसमैश्चैव मृगैर्मृदुनिनादितम् ।
विशतुः क्रमशो वीरौ अरण्यं शुभकाननम् ।
जानक्या रहितौ वीरौ कोदण्डप्रवरान्वितौ ।
शृण्वन्तौ प्रीतिजननम्मयूरान्मधुकान्शुकान् ।
श्रोत्ररम्यान्सुमधुराञ्छब्दान्नरमुखेरितान् ।
सर्वत्र फलदान्रम्यान् सर्वत्रकुसुमोज्ज्वलान् ।
पश्यन्तौ पादपांश्चापि फलभाराभिनमितान् ।
आम्रानाम्रातकान्फुल्लान्नालिकेरान्सतिन्दुकान् ।
अज्ञातकांस्तथा जीरान् डाडिमान् बीजपूरकान् ।
पनसान्लिकुचान्मोचान् खर्जूरानाम्रवेतसान् ।
53 पारावतांश्च जम्बीरान् निम्बांश्चापि मनोरमान् ।
बिल्वान्कपित्थजम्बूकान् काश्मरीबदरीस्तथा ।
प्लक्षानुदुंबरान्वंशान्वकुलान्क्षीरिणीस्तथा ।
भल्लातकानामलकान्हरीतकविभीतकान् ।
इङ्गुदान्करवीरांश्च तिलकांश्च महाफलान् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एतानन्यांश्च विविधान्ददर्श नलिनीतटे ।
तथैव चंपकाशोकान्केतकान्वकुलांस्तथा ।
* ददर्श राघवस्तत्र पंपातीरसमुत्थितान् ।
आरण्यकाण्डमाहात्म्यं ये शृण्वन्ति महीतले ।
श्रीराघवप्रसादेन विष्णुलोकनिवासिनः ॥
* पारिजातान्कोविदारान्देवदारुतरूंस्तथा ।
शाल्मलीस्तिन्दुकाशोकशिंशुपांस्तरूंस्तथा ।

इति श्रीमदुमासंहितायां श्रीमदारण्य-
काण्डकथाफलवर्णनं
नाम नवमोऽध्यायः ।
। श्रीरामश्शरणं मम ।
x

2

(॥ अथ दशमोऽध्यायः ॥)

स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम् ।
रामस्सौमित्रिसहितो विललापाकुलेन्द्रियः ।
महेश्वरः—
किष्किन्धाकाण्डमाहात्म्यं प्रवक्ष्यामि गिरीन्द्रजे ।
रामो वसन्तमालक्ष्य विललापाकुलेन्द्रियः ।
अनङ्गबाणाभिहतः कामकथाव्याकुले जने ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वासन्तो मलयो वायुः पुष्पाणि स्फुरश्रीणि च
ज्योत्स्ना च चन्दनं पक्षी कामो चौलकराणि वै
वैमुख्यं गतकल्यास्तु भ्रमरानशापभ्रुः
कोकान्ति शीथे निश्लेषं पिकमन्यनिवर्धनम्
चन्दनं सर्पनिलयं वायुं सर्पाशनं तथा
ज्योत्स्नां कलङ्कसहितां शशाप रघुनन्दनः
53a कामिनां गतिराख्याता सर्वाचारविधायिना
सीताविरहसन्तप्तो रामो दुःखी न दृश्यते
विशिष्टचापं श्रीरामं दृष्ट्वा वेगेन दुद्रुवे
सुग्रीवो मारुतिं तत्र प्रेषयामास राघवे
मारुतिप्रेषणं श्रुत्वा स्वद्रुं लभते नरः
राममारुतिसंवादश्रवणाद्राज्यमाप्नुयात्
कुण्डलं वायुतनये दृष्ट्वा दृश्य रघूद्वहः
प्राशंसत हनूमन्तं राघवो नलयलंपटः

उमा —
भवद्रूपस्य रामस्य सुग्रीवे प्रणतिः कथम्
वदनिस्संशयं देवदेवेश मम वल्लभ

महेश्वरः —
भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रामदर्शनमात्रेण गतकर्मनिबन्धन ः
स्वाभिन्नत्वान्नमस्कारैः स्वे महिम्नि प्रतिष्ठितः
ह्री ऋक्षरजा नाम ब्रह्मणो मानसस्सुतः
सत्यलोके महोद्याने सञ्चचार यदृच्छया
सूर्यातपपरिक्लिष्टस्स्विन्नगात्रः पिपासितः
कल्याणसरसि स्नातस्तेनासीत्तरुणी वधूः
दर्शनार्थं पद्मयोनेरिन्द्रो गच्छद्यदृच्छया
तां दृष्ट्वा कामयद्वज्री ब्रह्मणो निलये प्रभो
पुत्रमुत्पादयामास भविष्यत्कार्यगौरवात्
भास्करोऽपि विधिं द्रष्टुमागतः प्रेक्ष्य सुन्दरीम्
रमयामास कामार्तः पुत्रो जज्ञे दिवि श्रुतः
ज्येष्ठो वालीति विख्यातस्सुग्रीवस्तदनन्तरः
महावंशप्रसूतानां नमस्कारोऽपि युज्यते
परिभ्रष्टो दशान्तेन दशाभागेन सेव्यते
दशाभागगतो हीने नमस्कारो विधीयते
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः
इति द्योतयितुं प्रोक्तो लक्ष्मणेन नमस्क्रिया
54 राघवेन्द्रहरीन्द्रस्य सख्यमग्निपुरस्कृतम्
अपांकुलो भवेच्छ्रुत्वा अग्निसाक्षिकृतो यतः
सीताकपीन्द्रक्षणदाचराणां राजीवहेमज्वलनोपमानि

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुग्रीवराम प्रणय प्रसङ्गे। वामानि नेत्राणि स्मृ स्फुरन्ति ।
तस्मिन्क्षणे दक्षिणमायताक्ष्या मयोऽद्भवाया: परितो नन्तं ।
दृष्ट्वा विचित्रं परितापयुक्तं विशङ्कदुरं वाक्यमुवाच साध्वी ।
कालेकाले विचित्राणि दृश्यन्ते क्षणदाचर ।
अशुभानि निमित्तानि तेषां शान्ति वदामि ते ।
सीता प्रदेया रामाय नमस्कार पुरस्सरम् ।
अन्योन्य दुःख सल्लापं श्रुत्वा दुःखाद्विमुच्यते ।
विद्याबलं दैवबलं ज्ञानं बन्धुबलं तथा ।
सेनाबलं भवेत्तस्य वालिनो बलकीर्तनात् ।
आत्मश्लाघाच्च मरणं परनिन्दाच्च तत्समः ।
विश्वास पातकश्चैव आक्रियस्य वधस्तथा ।
सुग्रीव दत्तं वीक्ष्यैव सीताया भूषणम् ।

लक्ष्मण: —

नाहं जानामि केयूरे नाहं जानामि कुण्डले ।
नूपुरेत्वभिजानामि नित्यं पादाभिवन्दनात् ।
शाखा मृगेन्द्र वचसा रघुनायकोऽपि ।
कोदण्डरक्तकर मात्तशरं विधाय ।
पादाग्रपीडनवशेन फणिधरेन्द्र मौलि -
स्थितानक्षीति कुहान्नकुमेव चक्रे ॥
सप्तभूमिं सप्तगिरिं सप्तसालान्महाबलान् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कदम्बो वेगसंपन्नो भित्वा तूणीरमाविशत् ।

सुग्रीवाश्वासनं चैव वालिनो वधवर्णनम् ।

गिरीणां भेदनं चैव किष्किन्धागमनं तथा ।

वालिसुग्रीवयोर्युद्धं श्रुत्वा नियमपूर्वकम् ।

युद्धे विजयमाप्नोति वालिनो विजयो यथा ।

उमा —

वालिसुग्रीवयोर्युद्धे अदृश्यः केन राघवः ।

संशयं वद मन्नाथ संशयच्छेदको भवान् ।

महेश्वरः —

असुराश्च सुराश्चापि संभूय ब्रह्मणोऽन्तिकम् ।

गत्वा पप्रच्छुरमरा योत्स्यामः केन कर्मणा ।

मन्थानं मन्दरं कृत्वा योक्त्रं कृत्वान्य वासुकिम् ।

मन्थने क्रियतां यत्नो यावत्पीयूषदर्शनम् ।

इत्थं पद्मभुवा प्रोक्ताः समेत्य असुरास्सुराः ।

ममन्थुः कलशांभोधिं पीयूषोत्पत्तिलिप्सया ।

वक्त्रं देवासुराः पुच्छं विचकर्षुररिन्दमाः ।

विषाग्निना दह्यमानान्वीक्ष्य देवो हरिस्सुरान् ।

उत्तमानाः कर्षयध्वमुत्तमा इतरे परे ।

स्था

इत्यूचिवान्सार्ङ्गपाणिर्वक्त्रं दैत्या अथाग्रहीत् ।

पुच्छमाकर्षणसक्तानां सुराणां क्लेशशान्तये ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आहूय वालिनं देवो दत्वा वरमनुत्तमम्
प्रतीपवर्तिनो भूयादर्धं बलमरिन्दम
इति दत्वा वरं देवः काञ्चनं कमलस्रजम्
प्रदाय वानरेन्द्राय ममर्द्धिं कलशाम्बुधिम्
तया भूषितकण्ठस्य बलं प्राबलमेव च
शोभन्ते वर्धते नित्यं काञ्चनाम्बुज धारणात्

उमा —

रामेण निधनं वालेरन्येन परिपृच्छितः
अयुक्तच्छद्मना युद्धं प्रच्छन्ननिधनं तथा
भूभार भरणार्थाय देवकार्यचिकीर्षया
अवतीर्णो हरिरिति श्रूयते बालकाण्डके
न तस्य मित्रं न द्वेष्या लाभालाभे प्रियाप्रिये
कलशाब्धेस्तटे देवं शङ्खचक्रगदाधरम्
संप्राप्य वेधसा दिष्टास्सृजध्वं कामरूपिणः
असंहार्यगुणोपेतानप्रमेयपराक्रमान्
5.5 वाली रिन्द्रात्समुत्पन्नस्सुग्रीवो भास्करात्मजः
कृपीडयोनेरुत्पन्नो नीलो हरिचमूपतिः
मरुतोरस्सकाशाद्द्रौंशादुत्पन्नो हनुमान्कपिः

उमा —

सोमायाग्निस्तेजो तस्सुषेणो वरुणात्मजः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मृत्योस्सकाशादुत्पन्नाः पञ्चवानरसत्तमाः
इन्द्रात्मजे हरीन्द्रे तु निधनं लोकगर्हितम्
महेश्वरः —

लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान्वा हिमं त्यजेत्
रामस्त्यजेन्न प्रतिज्ञां समुद्रो विजलो यदि
सुग्रीवाय प्रतिज्ञातं वालिनो निधनं प्रति
श्रीमता सहसंबन्धो न मे लक्ष्मण रोच्यते
गते तु मानहानिस्स्यादागते तु धनक्षयम्
तस्मात्सुग्रीवसख्यं तु रोचते मम सांप्रतम्
अद्यैवैव गन्तव्यमन्यथा शरणं व्रजेत्
मनसा वचसा वापि कायेनापि नमेद्यदि
सकृदेव प्रपन्नाय तवास्मीति च याचते
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतम्मम
अभये वार्थिने दत्ते प्रतिज्ञा परिहीयते
रावणस्य सहायाच्च रावणोपि व्रजेत माम्
रावणस्य वधाभावादवतारफलं नहि
पूर्वापरभवं वीक्ष्य वालेर्निधनमिष्यते
अन्यथा रघुनाथस्य यशो हीयेत वालिनि
ताराप्रलापमाकर्ण्य वालिनो निधनं तथा
कपीन्द्र संस्कृतिं श्रुत्वा नारी अविधवा भवेत्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दीर्घायुष्यं भवेद्भर्तुः पुत्रिणी सा भविष्यति ।
हनुमत्प्रमुखैर्वीरैर्लक्ष्मणप्रमुखैर्द्विजैः ।
अभिषेकश्च ताराया रुमायाः प्राप्तिमुत्तमाम् ॥
सुग्रीवस्य सदा श्रुत्वा राज्यलाभं स गच्छति ।
शृणोति या स्त्री तारायास्सुग्रीवेण समागमम् ।
अच्छिन्नप्रीतिसंयुक्ता रमते नायकेन सा ।

उमा ——

पुत्रभार्या शिष्यभार्या कनिष्ठभ्रातुरेव च ।
स्नुषा च ज्येष्ठभार्या च मातुलस्य कुटुम्बिनी ।
मातृकल्पा इति ख्याताः कथं तारासमागमः ।
५५a स्नुषागमे निषिद्धता संसर्गं लोकनिन्दितम् ।

महेश्वरः ——

अयोनिजास्वङ्गनासु गमने नैव किल्बिषम् ।
शापात्पुरस्ताद्बोधाय श्वेतकेतोः पुराङ्गना ।
तारायास्संभवं देवि शृणु क्षीराब्धिमन्थने ।
तारा लक्ष्मीः पशुश्चैव कल्पवृक्षस्तथैव च ।
अहल्याप्सरसश्चैव समुत्पन्ना हि सुन्दरि ।
कराग्रं दक्षिणं वाली सुषेणो वाममग्रहीत् ।
ममेयमिति निश्चित्य कलिरन्योन्यमुद्धतौ ।
देवैस्सुषेणस्य करे प्रतीतिं प्रतिपादित ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(ब)

सुषेणो दुहितायास्तु स्वयं वैरमकल्पयत् ।
ब्राह्मे मुहूर्ते उत्थाय पूर्वपश्चिमवारिधौ ।
~~देवैस्तु~~ दक्षिणे उत्तरे चैव स्नात्वा नत्वामहेश्वरम् ।
निरूपाक्षाग्निर्ध्यं नित्यं कल्पवृक्षप्रसूनकैः ।
अर्चयेद्यदि तस्येयं भार्या स्यात्सुरवर्णिनि ।
एवं कृते वानरेन्द्र नाशो कुस्पन्दितुं पदम् ।
वाली क्रमेण त्रिर्नीरं कृतवानक्रमेण तु ।
इत्थमूढा कपीन्द्रेण तारा सर्वाङ्गसुन्दरी ।
सुग्रीवमेकदा रात्रौ रूपसादृश्यमोहिता ।
प्रार्थयामास कामार्ता स्वं रतिपतिप्रभम् ।
अहल्या द्रौपदी सीता तारा मन्दोदरी तथा ।
नित्ययौवनसंपन्नाः पातिव्रत्यसुरान्विताः ।
रुमाया योनिजातायां गमनं लोकगर्हितम् ।
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ।
सर्वैः प्रत्यक्षदृष्टत्वात् सिद्धवत्कथनं कुर्वन् ।
सर्वे लङ्कापुरीं गत्वा ऋक्षवालीपदानुगाः ।
शाखाचंक्रमणन्यायात्सर्वत्र परिमार्गितुम् ।
उदयाचलमारभ्य यावदस्तमयाचलम् ।
मार्गित्वाभ्यगमन्वीरा यावत्कैलासपर्वतम् ।
नीलोऽङ्गदो हनूमांश्च जाम्बवान्केसरी ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

समुद्रतीरमागत्य न शेकुस्स्पन्दितुं पदम् ।
56 रावणस्य बलं ज्ञात्वा तीरे नदनदीपतेः ।
रामायणतरोस्स्कन्धाष्षट्काण्डानि तथोत्तरम् ।
जानकीरघुनाथाख्यौ फलौ नित्यफलप्रदौ ।
सुग्रीवाद्या हरिवराश्शाखा अन्ये दलास्स्मृताः ।
भरताद्याः प्रसूनानि वर्धनं कोसलवंशजो ।
प्राचेतसा वर्धितोऽसौ सेव्यो नित्यं मुमुक्षुभिः ॥

इति श्रीमदुमासंहितायां किष्किन्धा-
काण्डफलवर्णनं नाम
दशमोऽध्यायः ॥

(२)

(॥ अथ एकादशोऽध्यायः ॥)

महेश्वरः —

ततो रावणनीतायास्सीतायाश्शात्रुकर्शनः ।
इयेष पदमन्वेष्टुं चारणाचरिते पथि ।
मध्ये समुद्रमुत्पन्ना ह्यन्तरायाः पृथक् पृथक् ।
तानि सर्वाणि नष्टानि दानमहात्म्ये यथा ।
श्रीरामसेविनां नृणां न कदाचित् क्वचित् भयं प्रिये ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रीरामस्मरणादेव तरन्ति भवसागरान् ।
रामाङ्कितकरो वार्धिन्तीर्णवांच्चैव किम् ।
सुन्दरं प्रथमं श्रुत्वा हनूमद्विक्रमाङ्कितम् ।
ज्वरापस्मारकुष्ठादि भूतवेतालनाशनम् ।
श्रुत्यन्ते जपतो नित्यं मदनिस्तायुज्यं भवति ध्रुवम् ।
पुरा काम्बोजविषये यौवनाश्व इति श्रुतः ।
ब्राह्मणो जटिलो नित्यं शिवपूजापरायणः ।
उपवासमिषेणैव मोहयामास लौकिकान् ।
शक्तिक्षेत्रं समासाद्य उवास बहुवत्सरम् ।
अर्चितं कुसुमं-चापि पञ्चगव्यफलानि-च ।
केनापि नैव भोज्यानि अन्धकूपे विनिक्षिपेत् ।
षण्मासं तत्फलाशी-च क्षीराज्यमधुसेवकः ।
अपस्मारी स जनिता तस्मिन्जन्मनि स द्विजः ।
एवं गते बहुदिने ब्राह्मणं गाधिवंशजम् ।
प्रणम्य स्वस्य वृत्तान्तं स्वदेहस्थितिमेव-च ।
सोऽपि ध्यात्वोपदिशति सुन्दरं प्रथमं मनुम् ।
सुन्दर प्रथम मन्त्रस्य वाल्मीकि ऋषिः अनुष्टुप
छन्दः आञ्जनेयो देवता, ध्या

॥ ध्यानम् ॥

आञ्जनेयमतिपाटलाननं काञ्चनाद्रि कमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति ध्यात्वा जपेन्मर्त्यो मारुतेर्मनुमादरात् ।
56a हनूमानञ्जनासूनुर्वायुपुत्रो ~~कपिनायकः~~ महाबलः ।
कपीन्द्रः पिङ्गलाक्षश्च लङ्काद्वीपभयंकरः ।
प्रभञ्जनसुतो वीरस्सीताशोकविनाशनः ।
अक्षहन्ता रामसखो रामकार्यधुरन्धरः ।
महौषधिगिरेर्हारी वानरप्राणदायकः ।
वारीशतारकश्चैव मैनाकगिरिभञ्जनः ।
निरञ्जनो जितक्रोधः कदलीवनसंवृतः ।
ऊर्ध्वरेता महासत्वस्सर्वतन्त्रप्रवर्तकः ।
महालिङ्गप्रतिष्ठाता भाष्यकृज्जपतां वरः ।
शिवध्यानरतो नित्यं शिवपूजापरायणः ।
इत्थमेव जपेन्नित्यमुनास्स कतिचित्समाः ।
तेन शान्तिस्समभवदपस्मारश्च सुन्दरि ।
प्रदोषे प्राविशल्लङ्कां मातुर्मानधरो हरिः ।
लंकाप्रवेशसमये लङ्कानाम निशाचरी ।
पद्मासनाल्लब्धवरा ताडयामास वानरम् ।
नारीति मन्यमानेन ताडिता वामबाहुना ।
विह्वला वीतदशना पपात समराङ्गिते ।
विह्वलां भगिनीं ज्ञात्वा ब्रह्मलोकं निशाचरी ।
हनूमद्ग्रहणव्यग्रा कर्कटी ताडयत्स्वयम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तां ज्ञात्वा लोकसंहारीं तद्धस्तात् दण्डकम् ।
गृहीत्वा ताडयामास पपात च ममार च ।
तस्मिन्क्षणे समायातो ब्रह्मा लोकपितामहः ।
प्रोवाच रामदूतं तं क्रोधनिष्कारितोष्टकम् ।
शान्तिं त्वं दोषराहित्यं माकल्पं परिवर्तनम् ।
दत्वा मदन्तिके बद्ध्वा स्थापिता लोकघातिनी ।
मामनादृत्य सा चण्डी निर्भूय लोकमारिणी ।
इयं लोकहितायैव पवनात्मज ताडिता ।
अनया पीड्यमानानां नराणां मृतिमिच्छताम् ।
त्वन्नामस्मरणादेव त्वन्मन्त्रपठनादपि ।
त्वदर्चापूजनाच्चापि ब्राह्मणानां तु पूजनात् ।
शान्तिर्नित्यं भवत्येव इयञ्जीव तु मारुते ।
इत्युक्त्वा तां समादाय वेधा लोकपितामहः ।
चचार मारुतिर्लङ्कां राक्षसानां कुले कुले ।
ददर्श राक्षसांस्तत्र वेदघोषसमन्वितान् ।
अग्निहोत्राश्च वेदाश्च राक्षसानां कुले कुले ।
दया सत्यञ्च शौचञ्च राक्षसानां न विद्यते ।
57 दर्भमुष्टिप्रहरणान्ददर्श ब्रह्मराक्षसान् ।
ददर्श राक्षसेन्द्रस्य . मन्नः फुरं महत् ।
प्रसुप्तं स्त्रीजनं तत्र यौवतं गाजिणं तथा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्र मन्दोदरी नाम भार्यामन्तःपुरेश्वरीम्

प्रेक्ष्य सीताधिया तत्र वानरत्वं प्रदर्शिवान्

सृक्किण्या जलानि स्रावाद्विपिनेयं भविष्यति

नैव सीता विशिष्टाङ्गी रावणस्य प्रिया भवेत्

मद्यशालां ददर्शाथ मार्गमायूरकुक्कुटान्

अर्धार्धं भक्षितांश्चापि ददर्श स्फुटितांस्तथा

उमा ——

ब्राह्मणैर्न सुरा पेया गो प्राज्ञस्य पापकारिणी

सुरकल्पान्यभक्ष्याणि श्रुतिस्तु न सुरां पिबेत्

आर्द्रकं सगुडं मद्यं सैन्धवं बादरस्तथा

नालिकेराम्बु कांस्ये च दध्ना सम्मिश्रितो गुडः

सर्षपं चैव तक्रस्यात्ताम्रे गव्यं सुरासमम्

ताम्रे गुडरसं चैव सुरया तुलितं बुधैः

सशाकदभक्षणं चापि तर्जन्या दन्तधावनम्

(शि)
शूद्रप्रेषित भुक्तिश्च पुष्पिणी मुखसेवनम्

अकालेऽभ्यञ्जनं चापि शिष्टतैलस्य भक्षणम्

पलण्डुश्च पलाण्डुश्च पीयूषं गृञ्जनं तथा

कन्दाश्च रक्तकन्दांश्च रक्तशिग्रुस्तथैव च

कोशातकी कम्बकारच्या स्त्रीभिर्भुक्तावशिष्टकम्

इत्यादि वर्जनीयम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

न दोषो मातृकल्पासु परलोकप्रदीपकः ।

महेश्वरः ———

शुक्रशापात्पुरा देवि सुरापानं न दुष्यति ।
श्वेतकेतोः पुरा शापात् परदारा न दुष्यति ।
अशोकवनिका मध्ये शिंशुपा मूलमाश्रिताम् ।
ददर्श हनुमांस्तत्र निरानन्दां तपस्विनीम् ।
सीता दर्शनमाकर्ण्य वीतशोको भविष्यति ।
लक्ष्मीस्तस्य गृहे नित्यमनपाया भविष्यति ।
पुत्रवृद्धिर्ज्ञानवृद्धिर्धनवृद्धिस्तथैव च ।
गृहारामकलत्राणां नित्यं वृद्धिर्भविष्यति ।
निशाद्वितीये मदपूर्णदृष्टिः
सीतां स्मरन्यौवनमन्वितस्सः ।
अनन्तदीपप्रभया प्रकाशयन्
समाययाशोकवनस्थलीं ततः ॥
अशोकपर्णे मशकप्रमाणः
सीतान्द्रुरुक्तां परिभर्त्स्यमानाम् ।
निरावणं रावणमाततायिनं
प्रोवाच साध्वी कृतमार्गदर्शिनी ॥
नत्वां करोमि दशग्रीव भस्म भस्मार्हतेजसा ।
57a तपःछायाद्यशो हानेर्मत्पतेस्सह्यते मया ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

उमा —

सीताया ग्रहणं नित्यं दुरुक्ति कथनं तथा ।
सीता तर्जित वाक्येन संशयो जायते मम ।
पतिव्रताया निश्वासो तीक्ष्णं कोपसंयुतम् ।
अश्रूणां चैव पतनं कुलं दहति वह्निवत् ।
चिता धूमाकुल यथा गृध्रमण्डल मण्डिता ।
हतनाथा हतजना श्मशानसदृशी भवेत् ।
इति शापं भूसुतया इयं सा दुःखिनी कथम् ।

महेश्वरः —

रामे विरक्त दन्तत्वं लक्ष्मणे पादकिङ्किणी ।
सीताया भिन्नकेशोमाणि तस्मात्क्लेश सहिष्णुता ।
अत्रेतिहासं वक्ष्यामि शृणु शैलसुते प्रिये ।
पुरा राथन्तरे कल्पे वर्तमाने कलौ युगे ।
कल्पाङ्कुरवधार्थाय गते मयि शुचिस्मिते ।
अन्धको नाम दैत्येन्द्रो ब्रह्मदत्तवरो बली ।
ब्रह्माणं वज्रिणं जित्वा चक्रपाणिमनन्तरम् ।
गोवर्धनं गिरिवरं प्राप्तवान् जय काङ्क्षया ।
शैलादिना समजनि जन्यमन्योन्य भुलक्षणाम् ।
त्रिशूल क्षतगात्रेभ्य अन्धका बहवो भवन् ।
तत्र तत्रापि बहव अन्धकाः कारवन्च ... ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

समुत्पन्नास्तु तैः पूर्णं त्रैलोक्यं सचराचरम्
पराङ्मुखो भवन्नन्धो शिवस्यान्तःपुरं गतः
तद्गृहे शेमुषीं कृत्वा त्वान्ध्यायन्त्रिपुरेश्वरीम्
तद्रक्षणार्थं निर्दोषो विष्णुर्मायाविना नरः
अभ्यर्णमागतं ज्ञात्वा अपर्णे सृजकामिनीः
देव्यो विसृष्टा देवेशि तद्रूपिण्यो वरानने
तास्त्वेकां परिजग्राह मृडानीशङ्कया किल
विनिर्गते विरूपाक्षे विष्णुमायावशादभूत्
पुनरन्यां च साप्येवं पुनरन्या च साप्यभूत्
एवं काले बहुगते देवी क्रोधवशं गता
नव दारान्दुराधर्षान्नित्यपुष्टां करीषिणीम्
पीयूषपरिषां दिव्यां दिव्यसंस्कारसंस्कृताम्
स्रष्टाधिष्ठाय नगरीं स्रष्टा देव्या महाबलाः
नित्या च नित्यक्लिन्ना च भारुण्डा वह्निवासिनी
महस्रुवाद्या योगिन्यो वशिन्याद्याश्शुचिस्मिताः
तास्सर्वा भक्षयामासुर्दैत्यानन्तःपुरस्थितान्
नित्याक्लिन्ना च सहसा जठरे राक्षसप्रभम्
६४ कल्पं बभार कल्पान्ते जीर्णोऽभूद्राक्षसप्रभः
तद्देव्या रामदेव्याः प्रतिबिम्बसमुत्थिता
सीता वेदवती जाता सा जाता जनकात्मजा

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

लोकसंरक्षणार्थाय सोद्धा तिष्ठति शोभने ।
निर्गते राक्षसेन्द्रे तु राक्षस्यः क्रोधमूर्छिताः ।
भर्त्सनार्थाय तां सीतां पृथग्वाक्यमुदीरयन् ।
तृणवद्भाषितं तासां गणयामास जानकी ।
स्वप्नाध्यायमुपाश्रुत्य दुस्वप्नं नश्यति ध्रुवम् ।
राजा दशरथो नाम रथकुञ्जरवाजिमान् ।
सीतासंभाषणं चापि रामलक्ष्मणशासनम् ।
श्रीराममुद्रादानं च ये शृण्वन्त्यादरेण तु ।
निर्जित्य शत्रून्सङ्ग्रामे स्थिरं राज्यं व्रजन्ति ते ।
अभिज्ञानं ददामि त्वां येन ज्ञास्यति राघवः ।
मत्सकाशात्तु प्राप्तं चित्रकं गैरिकेण मे ।
पत्रालं चन्दनं चापि करटाक्षिनिबर्हणम् ।
दर्शनं श्वशुरस्यापि मत्कांक्षां लक्ष्मणस्य तु ।
प्रविश्य दण्डकारण्यं शरभङ्गनिरीक्षणम् ।
सुतीक्ष्णेनाभ्यनुज्ञातस्तीर्थाटनधिया ध्रुवः ।
मण्डलं परिचक्राम राघवस्सहसीतया ।
गङ्गां मन्दाकिनीं चैव चित्रकूटगिरिं तथा ।
सीताकूपं सदाचोष्णं हरिद्रासारमेव च ।
रेवां गोदावरीं चैव विरूपाक्षं महेश्वरम् ।
श्रीशैलं नारसिंहं च अहोबिलमनुत्तमम् ।

श्रीवेङ्कटं कालहस्तिं काञ्च्यां हस्तिगिरीश्वरम् ।
कामाक्षीचूतनिलयां शोणाद्रिं वामदं तथा ।
श्रीमुष्णं पुण्डरीकं च वैद्यनाथमनुत्तमम् ।
श्वेतारण्यं मयूरारण्यं कावेर्या उत्तरे तटे ।
पीयूषकलशं चैव तथा नागचतुष्टये ।
केरवारण्यनदीतीरे स्वर्धुनीतीर एव च ।
शक्तिशोकाश्वक वने सुन्दरी श्रीनिवासके ।
कुंभघोणे स्नारनाम्नि शिवलिङ्गं यथाविधि ।
पञ्चाशतं महालिङ्गं कावेर्याः पुण्यरोधसि ।
महालिङ्गं प्रतिष्ठाप्य पूजयामास राघवः ।
नारायणगिरिं गत्वा सुब्रह्मण्यमनुत्तमम् ।
कोल्हापुरे महादुर्गां नासिकायां त्र्यम्बकम् ।
गोदावर्यां रघुपतिः सिंहस्थे देवमन्त्रिणि ।
स्नात्वा सन्तर्प्य देवान् तत्र श्राद्धमकल्पयत् ।
स्वयं दशरथस्तत्र भुक्त्वा श्राद्धभोजनम् ।
षष्टिर्वर्षसहस्राणि भागीरथ्यावगाहनम् ।
सकृद्गोदावरीस्नानं सिंहस्थे च बृहस्पतौ ।
शक्तिक्षेत्रगतं रामं प्रोवाच भरतानुजः ।
मदीयं त्रिणतं राम गृहीत्वा सशरं भवान् ।
लब्ध्वाभिज्ञानमतुलं हत्वा राक्षसपुङ्गवान्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दग्ध्वा लङ्कापुरीं तत्र दृष्ट्वा रावणमादरात् |
वानरेन्द्रैर्मधुवनं भङ्क्त्वा राघवमाययौ |
दृष्टा देवी मया माता अज्ञाता नियमास्थिता |
इति मारुतिवाक्येन प्रीतो रघुपतिर्भृशम् |
सर्वस्वभूतं गृह्णीष्व परिष्वङ्गो मया कृतः |
वरं ददामि पिङ्गाक्ष सर्वकार्यकरो भवान् |
त्वन्मन्त्रजापिनां नित्यं त्वन्नामस्मृतिकारिणाम् |
त्वदर्चापूजकानां च जनानां नियतात्मनाम् |
मत्कथोपास्थितिर्यावद्यावत्पर्वतरं स्थितिः |
यावच्चन्द्रश्च सूर्यश्च तावत्त्वं सुखितो भव |
यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् |
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् |
मोचावने तपस्तप्त्वा सुचिरं ब्रह्मचिन्तकः |
पश्चाच्चतुर्मुखो भूत्वा सृष्ट्वा लोकान्यथाविधि |
तल्लोकवासिभिस्सार्कं मत्स्वरूपमुपेष्यसि |
इति दत्वा वरं रामो मारुतेः कार्यगौरवात् |
प्रस्थानं शेचयामास रावणस्य वधाय वै |
श्रुत्वा तु पञ्चमं काण्डं ह(नू)मद्विजयाङ्कितम् |
आञ्जनेयप्रसादेन ब्रह्मलोकं स गच्छति ||

"इति श्रीमद्धनुमत्संहितायां सुन्दरकाण्ड-
कथाश्रवणफलं महिमानुवर्णनं
नामैकादशोऽध्यायः ॥

श्रीरामश्शरणं मम"

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

२

(अथ द्वादशोऽध्यायः ॥)

महेश्वरः —

युद्धकाण्डस्य माहात्म्यं प्रवक्ष्यामि शुभानने ।
श्रुत्वा हनूमतो वाक्यं यथावदनुभाषितम् ।
रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् ।
सीतावृत्तान्तसन्तुष्टो रामो मारुतिमादरात् ।
अब्रवीन्मम भक्तानामग्रणीर्भव मारुते ।
प्रपत्तिं पञ्चधा प्राप्य देहान्ते मुक्तिमेष्यसि ।
लाञ्छनञ्चोर्ध्वपुण्ड्रं च मदर्चापूजनं तथा ।
मद्भक्तपूजनं चापि गुरौ भक्तिस्तथैव च ।
३१ देवालयकृतिश्चैव मद्भक्तान्नस्य भक्षणम् ।
तुलसीभक्षणं नित्यं सालग्रामोदकाशनम् ।
रामायणादिपठनं तस्य पूजनमेव च ।
अभक्ष्याणां परित्यागो वैष्णवानां तु सेवनम् ।
न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः ।
सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने ।
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
सर्वपापाद्विमुच्यन्ते त्वामुद्धरिष्यामि संसृतेः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अभक्ष्याणि नदाम्यथ पर्युषितं लशुनं तथा ।

अलाबुग्रञ्जनञ्चैव शिग्रुकादितयन्तथा ।

कूश्माण्डादितयं चैव अलाबुद्वितयन्तथा ।

कन्दश्च रक्तकन्दञ्च
~~कुन्देश्च रक्तकन्देश्च~~ बृहतीञ्चैव जात्रकम् ।

आश्वयुज्यां पटोलीञ्च निष्पावं कार्तिके तथा ।

अष्टम्यां नारिकेलञ्च तृतीया भानुवासरे ।

एकादश्यामहोरात्रं नैव भोजनमाचरेत् ।

निशेषं मम मन्त्राणां प्रवर्तक निवर्तकः ।

भवान्सर्वयुगे भूयान्मत्कृपापरिपूरितः ।

रामप्रस्थानमाकर्ण्य पातका देहपञ्जरात् ।

नश्यन्ति तत्क्षणादेव सिंहस्ता मृगाइव ।

वा
~~वा~~हि घातयतः कान्ता तां दृष्ट्वा मामपि स्पृश ।

इत्यादिश्रवणात्रामदर्शनाद्गतकिल्बिषाः ।

श्रीरामसन्दर्शनाद्येव उत्पन्न ब्रह्मवेदनाः ।

पराभवात्पराकन्यान्नहि स्युरिह वानराः ।

दर्शयन्मानुषीं लीला मरीचिकामिव प्रभुः ।

लङ्कादाहे पुष्पकाग्रे विष्णुपद्यामवस्थितः ।

रावणः पुनरागम्य मयं दानवसत्तमम् ।

आहूय विश्वकर्माणं कारयामास पत्तनम् ।

त्रिंशद्योजनविस्तारं चत्वारिंशत्तमायतम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रौप्यप्राकारसंपन्नं दुर्वर्ण रचितं तथा
अष्टापदमयाश्चापि प्राकारा बहुभि स्वृताः
नाना यन्त्रेण सहितां नानाट्टालकशोभिताम्
नानागोपुरसंकीर्णां नानातोरणमण्डिताम्
जाज्वल्यमानां विशिखां कृताकृतगृहान्तराम्
अगाधाश्शकुनाकीर्णाः परिखा मीनसेविताः
संक्रमा विपुलास्तत्र उपद्वारेषु भूरिशः
द्वारे द्वारे राक्षसानां कोटिकोटि निवेशिताः
अथ हेमसभामध्ये वसन्नाक्षसपुंगवः
आहूय मन्त्रिणस्सर्वान्मन्त्रं समुपचक्रमे
सीतायाः पदवीं रामो मार्गमाणो वनालयैः
59a सह सिन्धुपतेस्तीरे मूलन्नचेतुमागतः
तत्रोपायश्च पश्यध्वं येन श्रेयो गमिष्यथ
राजानं रक्षसां मध्ये माल्यवान् प्राह पूर्ववित्
शृणु राजन्प्रवक्ष्यामि सर्वेषां शोभनाय वै
पुरा देवयुगे शंभुः कैलासाचलमूर्धनि
वसत्यपर्णया देवो विश्वेशो विश्वभावनः
षड्पादस्समागम्य त्वरायुक्तश्शिवप्रियः
पञ्च सप्ततिवर्षाणां कालोयं समुपस्थितः
अनुज्ञां कुरु मत्पीडां दर्शने लोकहेतवे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इत्युक्तः पार्वतीनाथः छायासूनुमकल्मषम् ।
मदन्येषां भवेत्पीडा त्वत्पीडासंभवोऽस्ति वै ।
पुनर्दण्डं प्रदास्यामि मुद्रां युष्माकमेव च ।
भवान्सत्यन्न गच्छेत्तस्या द्वेला मम्कुधि सत्यजेत् ।
इत्युक्तो धूर्जटिरिस्से ऽद्वेषणाद्रिगते जले ।
ममज्ज शनिना दृष्टः पञ्चसप्तति वत्सरान् ।
सर्वथा रक्ष भगवन् गौरीं गरुडवाहन ।
इति सन्दिश्य भूतेशो रमाकान्तं जगद्गुरुम् ।
एतस्मिन्नन्तरे दैत्यो वकः कल्पान्तजीवनः ।
लब्ध्वा वरं पद्मयोनेस्सकाशाल्लोकपूजितात् ।
त्रिलोकविजये यत्नमास्थाय प्रास्थितो गृहात् ।
इन्द्रादीन्प्रथमं जित्वा ब्रह्माणं विष्णुमेव च ।
शङ्करस्य जयार्थी सः कैलासं समपद्यत ।
प्रमथान्प्रथमं जित्वा भवान्या भवनं वकः ।
प्राप्य स्त्रीवनमादातुमुपक्रामत वेगतः ।
देवीं गृहीतुकामन्तं दृष्ट्वा चक्रधरो हरिः ।
देवीस्वरूपा असृजद्यौवतं मोहनाय वै ।
तास्सर्वा अपि जग्राह देवीबुद्ध्या वकोऽसुरः ।
तास्सर्वा मोहयामासुरसुरं वकनामकम् ।
नात्र देवीति निश्चित्य शर्वाणीग्रहणोन्मुखः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भद्रकाली परिणता सहस्रभुजमण्डिता
वीक्षणेनैव संहृत्य त्रैलोक्यं सचराचरम्
वीक्षणेनैव ससृजे शर्वाणी सवमङ्गला
वकं विना कृत्स्नलोक मसृजच्छंकर प्रिया
तद्वज्जनकजा राज लोकानां प्रभवाप्यये
60 शक्ता तस्मादिमां मुञ्च रामं शरणमाव्रज
विभीषणोक्त श्रवणाद्धर्माभ्यां सफलं लभे भवेत्
किन्त्वां पापसमाप्त्यै मित्यादि श्रवणेन तु
धर्मत्याग समुद्भूता न्मुच्यते पातकान्तरः
क्षणाच्चतुर्भिस्सहितो राक्षसेन्द्रः स्वकल्मषैः
रामपादं समुद्दिश्य जगामोत्तर रोधसि
विभीषणः परिग्राह्य आहोस्विदपरिग्राह्यः
एतस्मिन्नन्तरे नाथेरुद्घोषं वीक्ष्य राघवः
वारयामास सहसा वारिधिं वेगवत्तरम्
अद्यापि स्तब्धसलिलो दृश्यते दशयोजनम्
दृश्यते रामवाक्येन लोके विश्वास सूचकम्
विभीषण परीक्षाया श्रवणान्मननं भवेत्
विभीषणो वा सुग्रीवो यदिवा रावणस्स्वयम्
आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया
सकृदेव प्रपन्नाय तवास्मीति च याचते

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतम्मम ।
प्रवृत्तिर्द्विविधा प्रोक्ता मार्जारी चैव वानरी ।
ज्ञानाभ्यासवतामो तु वानरी भक्तिमेव च ।
पाद्यमङ्गुलिविच्छेद उरो विन्यस्तमक्षरम् ।
तन्नामकरणं चैव दास्यमेतच्च तु ष्टयम् ।
अङ्कितं शङ्खचक्राभ्यामूर्ध्वपुण्ड्रस्य धारणम् ।
गुरौ भक्तिसमावेशः प्रपन्नानान्तु लक्षणम् ।
अष्टाक्षरं महामन्त्रं सद्गुरुप्रतिपादितम् ।
ये जपन्ति सदा भक्त्या ते प्रपन्नास्स्मृताः ।
निन्दास्तुती समे एषां समबुद्धिः परा अपि ।
व्यर्थाहंकारराहित्यं प्रपन्नस्य च लक्षणम् ।
पारायणं ये कुर्वन्ति श्रीमद्रामायणस्य तु ।
पुनर्वसुदिने पूजां प्रपन्ने बोधिका मता ।
ज्ञानाग्निस्सर्वकर्माणि यथा भस्म करोति वै ।
तद्वद्भक्त्याग्निना पापं नश्यत्येव न संशयः ।
तस्माद्रामो राक्षसेभ्य अभिषिच्य च सर्वथा ।
सेतुमारभ्य धान्नाम अभिषिच्य विभीषणम् ।
पूर्वं वेदवने सेतुर्भग्नस्स्वङ्कुरं रंहसा ।
दुर्गादेव्यास्तु नगरे द्वितीयस्सेतुरुच्यते ।
60 a तिमिरि आदिभिस्तत्तो पीडिता हरिजनमाः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(राम)

तृतीयो र सेतुस्स्याद्गन्धमादन मस्तके

सर्वलोकशरण्योऽपि रामो मानुषलीलया

शिक्षये दर्शस्तत्भूमौ सरिन्नाथप्रसादकः

रामो नदनदीनाथवाक्याद्दक्षिणसागरे

नलेन कारयामास सेतुं संसारतारकम्

कदाचिद्धनुषा सेतुं कदाचिद्विशिखेन तु

दार्वादिना कदाचित्तु कल्पे कल्पे व्यवस्थितः

द्वौ समुद्रेति वेदोऽपि सेतुषाम तथैव च

अनादिसेतुस्तवनं त्रयीभिरनुगीयते

ब्रह्महत्या सुरापानं स्वर्णस्तेयस्तथैव च

गुर्वङ्गनाभिगमनन्तत्संसर्गत्वमेव च

दर्शनाद्रामसेतोस्तु सर्वे नश्यन्ति पातकाः

ब्रह्महत्यासमानानि प्रवदामि शुचिस्मिते

वेदकृत्यं ब्रह्मनिन्दा देवताचलनं तथा

ब्रह्महत्यासमाः प्राहुरृषयो वेददर्शिनः

गणान्नं गणिकान्नं च ब्रह्महत्यासमं स्मृतम्

(क्षि)

शूद्रेण प्रेषितं भुक्त्वा चण्डालप्रेषितं तथा

कुक्षिण्या अभ्यनुज्ञातं ब्रह्महत्यासमं विदुः

मणिकाञ्चनमुक्तानां प्रवालहरणं तथा

सुवर्णस्तेयसदृशं प्राहुर्वेदविदो जनाः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रजस्वलामुखाघ्राणं कारुतीर्थनिषेवणम् ।
सुरापानसमं प्राहुर्वेदान्तपरिनिष्ठिताः ।
आत्रेयीगमनं चैव यज्ञपत्नीनिषेवणम् ।
भ्रातृस्त्रीगमनं चैव गुरुतल्पसमं स्मृतम् ।
सर्वद्रोहप्रहाणं ये वाञ्छन्ति श्रद्धयान्वितः ।
सेतौ स्नानं धनुष्कोट्यां कुर्वन्त्वघनिवृत्तये ।
सेतुना सागरं तीर्त्वा अरिष्टाचलमस्तके ।
रामस्सुखं वानराणां स्कन्धावारमकल्पयत् ।
अगस्त्याद्यास्समागम्य रामं रत्नमये शुभे ।
पीठे निवेश्य चक्रुस्ते विजयायाभिषेचनम् ।
तेऽग्रब्राह्मणोक्तैर्विविधैर्लङ्कायां लक्ष्मणाग्रजः ।
रामाभिषेकश्रवणाद्धनवान्पुत्रवान्भवेत् ।
पार्थिवो विजयी भूयाच्छ्रुत्वा रामाभिषेचनम् ।
वानरान्राघवः प्राह दाहेन परिपीडितान् ।
समुद्रतीरे सर्वत्र खन्यतां जलसिद्धये ।
यत्र वानरसञ्चारस्तत्रासन्नमृता इव ।
रामस्सुवेलशिखरं राकायामध्यरोहत ।
रामो लङ्कां समुद्वीक्ष्य पताकाध्वजमालिनीम् ।
चैत्यप्रासादशिखरे दृष्ट्वा राक्षसपुङ्गवम् ।
आसनं सर्वभूतानां भ्राजमानं स्वतेजसा ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शासनं सर्वभूतानां विष्णुचक्रगतत्राणम्
ऐरावतविषाणाग्रैः किणीकृतभुजान्तरम्
रामश्शरेण चिच्छेद दशत्राणामयुतं क्षणात्
श्रुत्वा सुग्रीवविजयं त्रैलोक्यविजयं भवेत्
कामक्रोधौ लोभमोहौ मदं मत्सर्यमेव च
असूयास्तेन पैशुन्ये डंभो हंकृतिरेव च
कदाहश्च कुशुक्षा च निन्दामौ दयपराभवौ
अलक्ष्मीः काककर्णी च रागद्वेषाश्शुभास्तथा
अनाचार श्रुतिद्वेष ब्रह्मद्वेषाश्शुभास्तथा
अज्ञानरूपं राजानं रावणं समुपाश्रिताः
शान्तिः क्षान्तिस्तितिक्षा च अनसूया तथैव च
अक्रोधो हिंसनं, लाभो दानं विज्ञानमेव च
अडंभमनसूया च अपैशुन्यं तथैव च
श्रद्धा अहिंसनश्चैव ब्राह्मणानां च पूजनम्
अग्निहोत्रादि धर्मश्च श्रद्धाभक्तिस्तथैव च
ज्ञानपक्षास्समाख्याता रामोनन्दमयो यतः
तस्मात्तत्पक्षमुत्सृज्य धर्मरूपो विभीषणः
परब्रह्ममयं राममाश्रित्य सुरवमाप्तवान्
अग्निहोत्राश्च वेदाश्च राक्षसानां गृहे गृहे
दया सत्यञ्च शौचञ्च राक्षसानां न विद्यते

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वैखानिनां हरीणांञ्च मोहिना रक्षसामपि ।
प्रथमादिषु तिथिषु प्रवृत्तो जन्म उत्तमः ।
पक्षे द्वे ब्रह्मणा सृष्टे धर्माधर्ममये शुभे ।
सुराणां धर्मपक्षस्स्याद धर्मो ह्यासुरो मतः ।
अधर्मस्य क्षयो यत्र तदा कृतयुगो भवेत् ।
भवेद्धर्मस्य नाशश्चेत्तदा तिष्यः प्रवर्तते ।
नागब्रह्मास्त्रयोर्बन्धमनुभूतम्महात्मनोः ।
वरदानं मानयन्तौ पक्षयोर्नेजगद्गुरोः ।
धूम्राक्षाद्या निशिचरा अधर्मप्रतिबिम्बकाः ।
हनूमत्प्रमुखैर्वीरैर्वृषरूपैर्निषूदिताः ।
रामसायकनिर्भिन्ना राक्षसाः पापवर्जिताः ।
ये हता लक्ष्मणेनैव सायुज्यं प्राप्य दुर्लभम् ।
मोदन्ते शङ्खचक्रेण शार्ङ्गिणा गदयान्विताः ।
भक्त्या केचिद्गतास्स्वर्गं केचिद्द्वेषेण कुत्रचित् ।
मैत्रेण स्वामिभावेन सम्बन्धात्कर्मयोगतः ।
ज्ञानेन तपसा चैव हननाद्विष्णुहस्ततः ।
अधिकारवतां मुक्तिस्तावन्नास्त्येव कुत्रचित् ।
कुंभकर्णस्य निधनं श्रुत्वा सङ्कुरुवक्रतः ।
कुंभिपाकगतान्सर्वानुत्तारयति पूर्विकान् ।
रावणोर्निधनं श्रुत्वा लक्ष्मणात्प्रीतिपूर्वकम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वर्गस्थाः पितरस्सर्वे विष्णुमन्दिरगामिनः ।
दशशीर्षाश्शतशिरास्सहस्रा युतमौलिनः ।
तावद्दस्ता दृता मौला रामेण रणमूर्धनि ।
रथानां दशकोटिस्या द्विजानां कोटिषोडश ।
कोटिकोटिपदातीनां गन्धर्वाणां त्रयोदश ।
राक्षसा रामनिहता क्षणार्धेन रणक्षितौ ।
विष्णुलोके विराजन्ते शङ्खचक्राङ्किता क्षणात् ।
शङ्खं कपालं करकञ्च पाणौ
धृत्वारिदण्डञ्च पिनाकमाद्यम्
एकं चतुः पञ्चकशीर्षयुक्तं
मौलं बलं हतवान्सक्षणेन ॥
गगनं गगनाकारं सागरस्सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ।
प्रधानं राक्षसेन्द्रस्य राघवेन्द्रस्य चोभयोः ।
62 श्रुत्वा नरः पापवृन्दान्मुच्यते जन्मकोटिभिः ।
आदित्यहृदयं नित्यं जपेत्प्रोक्ष्य दिवाकरम् ।
त्रिः प्रकारं शरीरान्ते शिवमन्दिरगो भवेत् ।
छिन्नानि दशशीर्षाणि कुण्डलाढ्यानि संयुगे ।
एकोत्तरशतं वारं सहस्रोत्तरतो दश ।
(व)
तानि ताम्रस्य अन्तस्य वेधसो वरगौरवात् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ब्रह्मास्त्रं योजयामास मातलेर्वाक्यगौरवात् ।
बिभेद हृदयं तस्य पपात च ममार च ।
छिन्नानां पुनरुत्पत्तिर्ब्रह्मणो *वरदानिका ।
हृदयस्य विभेदेन मरणं ब्रह्मनिर्मितम् ।
अभेद्यकवचं धत्ते रावणो हृदयस्य तु ।
नप्तारं ब्रह्मणो रामो हत्वा लोकस्य गुप्तये ।
सेतौ तीर्थे धनुष्कोट्यां कृतवान्पापशान्तये ।
विभीषणाद्यास्तु हृष्टा हतामित्रं रघूत्तमम् ।
निर्विघ्नं पूजयामासुः पाद्यार्घ्यैः सनन्दनैः ।
रावणान्तकमानृत्य वृन्दारकगणा दिवि ।
तत्र मौलौ रघुवरं दशशीर्षरिपुं रणे ।
ववृषुः पुष्पवर्षाणि सान्तानिकसमुद्भवैः ।
निधाय बाहुं त्रिणतस्य कोट्यां
मायोधनोद्धूतरजोच्छिताङ्गम् ।
जटाञ्चितं फुल्लमुखारविन्दं
पश्यन्ति रामं कृतपुण्यपुञ्जाः ॥
मित्रैस्समेतं हतशत्रुसागरं
कृपाकरं श्यामलदेहकान्तम् ।
कोदण्डदीक्षागुरुमादरेण
भजन्ति ये धन्यतमा धरण्याम् ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जटाधरं फुल्लमनो हासं सौमित्रिणा सेवितवाम आगम ।

शरासनं बाणवरंच हस्ते बिभ्राणमाद्यं गुरुमानतोऽस्मि ।

प्रशान्तपीडा बहुला निर्मला अभवन्दिशः ।

नागकन्या नागलोकमप्सरास्स्वर्गमन्दिरम् ।

तुम्बुरर्नृपनिकटं नारदस्सञ्चारिणुवाम् ।

हाहा हूहूमुखास्सर्वे कुबेरभवनं गताः ।

गार्हपत्यं गतो वह्निर्वरुणो गान्मणीव तम् ।

वायुर्वायुगृहं सोमस्स्वस्थानं प्रत्यपद्यत ।

भानुस्वाभानोर्विस्तारं हयानां विश्रमं तथा ।

ज्योतिषाञ्चैव सञ्चारो मध्याह्ने विश्रमो भवेत् ।

श्रुत्वा वानरसत्कारं सीतावाचि मरेः पुरे ।

आदिकन्नामोदसंयुक्तम्मोदन्ते दिवि देववत् ।

पुष्पकाग्रं समारुह्य सीतया सहराघवः ।

वानरै राक्षसैस्तस्माद् (कु) रान्प्रत्यपद्यत ।

62a अन्नपूर्वं महादेवः प्रसादमकरोद्विभुः ।

सन्ध्यानरः पुराकल्पे मयसम्यगभिष्टुतः ।

वानरान्तारयामास पिनाकेन कपालभृत् ।

वानरान्तारयामास पिनाकप्रभवे क्वचित् ।

पूर्णेचतुर्दशे वर्षे पञ्चम्यां रघुनन्दनः ।

भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इत्यादिश्रवणान्नृणां यावत्पट्टाभिषेचनम् ।
सर्वकार्याणि सिध्यन्ति पापराशिः प्रणश्यति ।
पुत्रवृद्धिर्धान्यवृद्धिर्धनवृद्धिस्तथैव च ।
आन्तं रामायणं विन्दत्येव न संशयः ।
साकेतनगरं रामभद्रो भद्रासने स्थितः ।
ऋषिभिस्सर्वतत्वज्ञैर्भ्रातृभिर्मन्त्रिभिस्तथा ।
पौरैस्सामन्तराजन्यैः राक्षसैर्वानरैस्तथा ।
अभिषिक्तश्रिया जुष्टः श्वेतछत्रविराजितः ।
अनर्घ्यमुक्ताभरणस्तप्तहाटकमण्डितः ।
पीताम्बरधरस्स्रग्वी दिव्यगन्धेन चर्चितः ।
अङ्गदी कुण्डली रामः सीतया सेवितस्सदा ।
प्रभञ्जनसुतस्तस्य अपादानप्रवर्तकः ।
न्यायेन कारयामास राज्यस्य परिपालनम् ।
प्रातःकाले समुत्थाय सरय्वां कृतमज्जनः ।
भस्मावकुण्ठितो रामो लसत्फालोर्ध्वपुण्ड्रकः ।
दर्पणादीन्समुद्वीक्ष्य सन्ध्याकर्म समाप्य च ।
श्रीरङ्गशायिनं देवं समभ्यर्च्य यथाविधि ।
शङ्खकाहलनिर्घोषैर्भेरीपटहनिस्वनैः ।
पुरस्कृत्य ययौ रामो मन्दिरं सरयूतटात् ।
तत्र च राघवस्याग्रे सूतमागधवन्दिनः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अयोध्याधिपती रामो दशकन्धरखण्डनः
सर्वतन्त्रप्रतिष्ठाता सर्वाचारप्रवर्तकः
इति काहळनादेन सर्वानानन्दयन् प्रभुः
नित्यं चचार भगवान् योगिध्येयो महेश्वरः
हुत्वा वैतानिकानग्नीन्सुवर्णं कोटिसंख्यकम्
पौष्टीहीनां सहस्रञ्च नित्यदानं प्रकीर्तितम्
दशवर्षसहस्राणि दशवर्षशतानि च
रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति
अनेककोटिलिङ्गानि शैवानां विधिपूर्वकम्
प्रतिष्ठां कृतवान्रामो लोकसन्तानहेतवे
राघवेणाभ्यनुज्ञातं राजन्यकमनिन्दितम्
धार्मि
63 . . तान्समुद्दिश्य गता राघवचिन्तकाः
उषित्वा वत्सरं सर्वे राक्षसा वानरास्तथा
अनुज्ञाता राघवेण . . प्राप्तो विभीषणः
मध्याह्ने विष्णुपूजार्थं कावेर्या मध्यतो हरिम्
निधाय विधिवत्स्नानं नित्यं सर्वं समाप्य ..
. . धाममध्यगं विष्णुं पूजयामास भक्तितः
तस्मिन्क्षणे परिणतं विमानं प्रणवाकृति
विमानं प्रणवाकारं वेदशृङ्गं म .. द्भुतम्
श्रीरङ्गशायी भगवान् प्रणवार्थप्रकाशकः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रङ्गं रङ्गमिति ब्रूयात् ~~क्षुत्प्रस्खलनादिषु~~
तस्य दोषाः प्रणश्यन्ति आयुर्वृद्धिश्च निश्चयात्
देशान्तरगतो वापि द्वीपान्तरगतोऽपि वा
श्रीरङ्गाभिमुखो भूत्वा प्रणिपत्य न सीदति
रङ्गमुद्वहमानस्य रावणावरजस्य च
आपातालं प्रविष्टस्य तोलने नाभवत्क्षमम्
विभीषण महाप्राज्ञ मा विषादं कुरु प्रभो
सह्यजानूपदेशोऽयं वैकुण्ठादधिकं प्रियम्
रमणीयोऽयमतुलो नद्योर्मध्ये विभीषण
कावेर्या विमले कच्छे यथा वैकुण्ठमन्दिरे
इच्छामि वस्तुमत्रैव सर्वेषां मोक्षदः स्वयम्
श्रीरङ्गदर्शनात्सर्वे क्रिमिकीटपतङ्गमाः
मनुजास्तिर्यगाश्चापि मोक्षगा रावणानुज
इक्ष्वाकुणा प्रार्थितोऽस्मि पुरा वैकुण्ठमन्दिरात्
अयोध्यामवसं पूर्वं राघवैः परिसेवितः
त्वयापि सेवितो नित्यं वसाम्याकल्पमत्र वै
लङ्कास्थो राक्षसश्रेष्ठ शकाया मासि माधवे
सह्यजाया जले स्नात्वा श्रीरङ्गनिलयं हरिम्
वैशाख्यामाम्रफलकं पयोपेतन्निवेदयेत्
तेन वत्सरपूजायाः फलं प्राप्नुहि राक्षस

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विभीषणो राक्षसेन्द्रो वैशाख्यां रङ्गमन्दिरे ।
पूजयत्यन्विशं देवि संवत्सर फलाप्तये ।
रङ्गधाम्ने राक्षसेन्द्रो मन्दिरं विश्वकर्मणा ।
कारयामास विधिवत्सप्त प्राकार शोभितम् ।
चन्द्रपुष्करणी तीरे श्रीदेवी शीतपुष्कर श्रीतरोरधः ।
संपूज्य हरिणादिष्टो लङ्कां प्राप्य विभीषणः ।
स्नात्वा कवेरजातोये दृष्ट्वा श्रीरंगशायिनम् ।
मोक्षलक्ष्मी परिणता मुक्तास्युरमरा इव ।
न्यायेन कारयामास राज्यस्य परिपालनम् ।
प्रच्छन्ना सञ्चरन्त्येव मानुषा इव राक्षसाः ।
63a काले वर्षति पर्जन्यः काले सस्यानि

राष्ट्राणि च सुपुष्टानि रत्नैभिश्शोभितानि वै ।
दुर्भिक्षा वग्रहैर्मुक्ता दस्युपीडाविवर्जिताः ।
शृण्वन्रामायणं भक्त्या यः पादं पदमेव वा ।
सयाति ब्रह्मणस्स्थानं ब्राह्मणा पूज्यते सदा ।
यः कर्णाञ्जलि संपुटैरहरहः सम्यक्पिबत्यादरात्
वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु ।
जन्मव्याधिजराविपत्तिमरणैरत्यन्तसोपद्रवं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

संसारं स विहाय गच्छति पुमान्विष्णोः पदं शाश्वतम् ॥

सकृद्रामायणं श्रुत्वा पुत्रवान्धनवान्भवेत् ।
स्त्रियो रजस्वलाः श्रुत्वा पुत्रान्सूयुरनुत्तमान् ।
रामायणं वदेद्यस्तु तस्य देहे रमापतिः ।
वाचि ब्रह्मा महेशोऽहं हृदये निवसाम्यहम् ।
तस्याक्षीणि रविश्चन्द्रो रोमकूपेषु देवताः ।
वक्ता प्राङ्मुख आसीत श्रोता चोत्तरदिङ्मुखः ।
मारुतिं पुरतः स्थाप्य पूजयेत्प्रत्यहं द्विजः ।
यथाशक्ति द्विजान्भोज्य भक्ष्यं व्यञ्जनसंयुतम् ।
ताम्बूलदानं सर्वेषां श्रोतॄणां परिकल्पयेत् ।
नत्वा नत्वा द्विजान्राजा शृणुयाद्विप्रवाक्यतः ।

अस्य श्रीरामायण महामन्त्रस्य । वाल्मीकि ऋषिः । अनुष्टुप् छन्दः । श्रीरामो देवता । हं बीजम् । सः शक्तिः । बुद्धिर्बीजम् । जीवशक्तिः । इडा बीजम् । पिङ्गला शक्तिः । सुषुम्ना नाडिमध्यवर्ती सरस्वती कीलकम् । श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः । ओं धर्मात्मने अङ्गुष्ठाभ्यां नमः । सत्यसन्धश्च तर्जनीभ्यां नमः । रामो मध्यमाभ्यां नमः । दाशरथिः अनामिकाभ्यां नमः । पौरुषेचाप्रतिद्वन्द्वः कनिष्ठिकाभ्यां नमः । शरैनं जहि रावणिं करतल-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

करपृष्ठाभ्यां नमः। एवं हृदयादिन्यासः।

ध्यानम्

सहस्रा . . संकाशं सर्वशत्रुनिबर्हणम् ।

रामं शक्तिमयं ध्याये द्रावणं रामसायकम् ।

धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि ।

पौरुषे चाप्रति द्वन्द्वः शरैनं जहि रावणिम् ।

दशकं वो जपेन्मन्त्रं पश्चाद्रामायणं चरेत् ।

रामचन्द्रप्रसादेन

64

. शो . . यः ॥

~~श्रीरा रुमे~~ — श्रीरामः शरणं मम — हरिः ओम् —

श्रीगुरुभ्यो नमः (श्रीसाम्बरम्) . . .

~~लिखनानसु~~ [illegible]

[illegible] ॥

— X —

ग्रन्थाक्षरालंकृत तालपत्रकोशं दृष्ट्वा लिखितमिदम् "अडे-यार् लैब्ररीतः" नटराजशर्मणा ॥

29. 11. 1963

No 73868

Palm leaf. Folia 64.

No of lines Per Page 11—15.

Script. granta. Size 9½ + 1½

1 – 50
11 – 1215

P.T.O

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.